श्रीगणेशायनमः॥ हेरंबंहिनमस्कृत्यनारायणगुरोतथा॥ कुंडदर्पणपद्यानांटीकां कुर्वेविदांमुदे॥१॥ कुंडदर्पणपद्यानासुगमा
सुगमार्थोविदांप्रति कदाचिदन्यथार्थत्वात्सदृदुर्बोधहेतुतः॥२॥ अल्पधीःप्रमुदेऽथास्यप्रकटार्थोनिगद्यते॥ क्षेत्रफ
लंहियेनैवनभवेदंतरंक्वचित्॥३॥ कुंडानिमंडपश्चैवयज्ञानामाज्ञमंगकं॥ यस्योनत्वाद्धिकत्वाद्धिभूरिदोषाभवंत्यलं॥४॥
ऊनत्वंचाधिकत्वंचज्ञायतेहिप्रमाणतः॥ प्रमाणंमुनिभिःप्रोक्तंत्रसरेणवादिकंचयत्॥ करांगंशास्त्रतोज्ञेयंतेनकुंडादि
कंचरेत्॥५॥ त्रसरेणवादियूकांतंक्षेत्रेसाध्यंहिनोभवेत्॥ मानज्ञानायशिष्याणांकथितंमुनिभिःकिल॥६॥ यद्यधि
कयाद्विचोनत्वात्क्षेत्रदोषोनविद्यते॥ तक्षणाद्विपानात्कुर्यात्कुंडमानंयथार्थतः॥७॥ अथकृन्नारायणस्यसूनुर्गंगाध
रोहंकुंडदर्पणस्यटीकांस्वमतिपरिणामात्संक्षेपतःकुर्वे॥ तत्रहियंथारंभणेदेवयज्ञभोक्तविष्णुप्रणामात्मकमंगलाच
रणपूर्वकंचिकीर्षितकुंडमंडपादिसाधनेप्रमाणसूत्रस्यावश्यकत्वात्तत्प्रमाणंहस्तादिनाज्ञेयमित्यतोहस्तादिमानं
श्लोकद्वयेनग्रंथकर्ताह॥ विष्णुं भजंनत्वाप्रवक्ष्येकुंडमंडपौसिध्यांतवचनैर्हितः॥ कनिष्ठांतश्चकूर्परा॥१॥ तत्रसिध्यां
२४ शोयुक्तंसास्यूवस्वर्ह शोयवउच्यते॥ यूकायवाष्ट भागोलिक्षातस्याष्टमांशकः॥२॥ व्यापकत्वात्विष्णुरीश्व
रोवातंनत्वकुंडमंडपौप्रवक्ष्यइत्यन्वयः॥ सिध्यांतवचनैःकृत्वाकूर्परादारभ्यकनिष्ठकाग्रंयावत्तावद्धस्तः सतुचतु
र्विंशांगुलोभवति॥ तस्यचतुर्विंश तमांशोंगुलं॥ अंगुलांष्टमांशोयवः॥ यवाष्टमांशोयूका॥ यूकाष्टमांशोलिक्षे
ति॥ हस्तस्याप्यरत्निसंज्ञाकात्यायनमतेन॥ सिध्यांतवचनानीतिसूत्रोक्तानि॥ तथाचश्रुतिः॥ तेवाउद्बाहुनापुरु
षेणमिमीतइत्यातथाचकात्यायनः॥ यज्ञभानिनोर्ध्वबाहुनाप्रपदोद्धितेनसमस्थितेनेत्यादि॥ प्रपदंचरणस्यपूर्वभा
गःपादांगुलिमूलमूलतलमित्यर्थः॥ चरणपार्ष्णीऊर्ध्वंकृत्वापुमान्प्रपदोद्धितोभवति॥ तथाचशुल्बसूत्रं॥ रत्नारत्नि

दैशावितस्तिविंशतिशतांगुलः पुरुषइति॥ तस्य पंचमांशस्त्वरत्निर्हस्तश्चतुर्विंशत्यंगुलपरिमितः स्यात्॥ वितस्ति
र्द्वादशांगुलो द्वादशांगुलं पद इति॥ तथा च श्रुतिः॥ चतुर्विंशत्यंगुलिभिर्निर्मीत इति चारत्नेश्चतुर्विंशति अं
गुलिता स्फुटादर्शिता॥ उक्तंच॥ विनांगुष्ठमारोपाभिर्मुष्टिमंगुलिभिः कृतं॥ चतुर्धा विभजेदेकोभागो मुष्टि
गुलिस्मृता॥ होमांगानि सुवाहीनि कुंडं मुष्टिगुलाश्रयति॥ पंचधा गुल चारस्तु कुंडं रामवाजपेयी होकायांवेद्यः रा
मवाजपेयिभिः स्वषोडशांशो नहस्तस्यापि अरत्निसांनिध्यादरत्निसंज्ञाकृतास्य रातार्हुक्कहोमविषया यदा
श्रयेण पस्तिष्ठेत तन्नाम्ना सतु वर्त्तते॥ मुष्टिमात्रं शतार्धं स्याच्छते चारत्निमात्रकमित्युक्तेर्मित॥ एकविंशांगुलकं मु
ष्टिमात्रं तस्यरत्निसंज्ञा॥ सार्धद्वाविंशांगुलमित्यरत्निसंज्ञा॥ चतुर्विंशांगुलकस्य हस्तसंज्ञा॥ हस्तस्यैवारत्नि
— कृतिमूलत्वादिति विवेकः॥ केचिदाधुनिकाः पूर्वाचार्यमता — कुंडं होमानुसारत इति वाक्यात्तत्रैराशिककल्पन
या आहुति उक्तकुंडक्षेत्रमध्ये गुलवृद्धिं यदा कल्पयेति तदा उक्तकुंडक्षेत्रा नवस्थास्यादपि तु मुष्टिमात्रं शत
ार्धं स्याच्छते चारत्निमात्रकमि — दानीं पूर्वाचार्योक्तवाक्यानां वैय्यर्थ्यापत्तिश्चाऽतस्तैस्त्रैराशिकमेव ज्ञातं
— केऽतिनविदितं अपि च पूर्वाचार्योक्तश्लोकेषु याक्षेत्रवृद्धिरस्ति सा — वबुध्या तस्माद् गुलवृद्धिकल्पनं
पदेशऋषिवचनाभावादसंग — तदभिप्रायः॥ उक्तंच॥ कुहेतुनानकर्तव्याकल्पनावाक्यतो विना — वाक्यस्य
वैय्यर्थ्याद्बहुदोषाभवंत्यत इति॥ होमास्तु मुनिभिः प्रोक्ताः कुंडमानं च तत्र च॥ पंचशदाहुतिहोमः शतहोमः
सहस्रकः॥ अयुतो लक्षहोमश्च प्रयतः कोटिहोमकः इति होमेषु क्रमशः कुंडमानं नयोच्यते॥ एकविंशांगुलं १
सार्धद्वाविंशं २ गुलकं तथा॥ अरत्निमात्रं १ द्विकरं २ चतुः ४ करं षट् ६ करं कोटिहोमे त्वष्ट ८ करमिति मा

नमुदाहृतमिति॥ एवंविधा पूर्वाचार्यैः होमानुसारेण इयमेव वृद्धि — अरत्निर्हस्त इत्युक्तं॥ सहस्रहोमान्नवसहस्रहोमपर्यंतं
— ३॥ ततो नामनेदादयुतान्नवायुतपर्यंतं द्विहस्तमेव॥ द्विहस्तमि — हस्तक्षेत्रफलकमित्यर्थः॥ द्विहस्तादीनां प्रमा
णसूत्रमग्रे वक्ष्य — ततो लक्षान्नवलक्षपर्यंतं चतुःकरमित्येवं सर्वत्र ज्ञेयं॥ अन्ये॥ लक्षहोमे हस्तमात्रं कुंडमु
क्तं तत्पतपुष्पादिशीघ्रदाहकवस्तु — यं तस्मान्महत्ताद्दे वप्रमाणमित्युक्तं॥ अथ समायां सा — नाशायां इत्य
ग्रे वक्ष्यमाणत्वात्पूर्वसंशोधितसमभूमौ दिक्साधन — पेक्षितत्वादादौ दिक्साधनसूचकप्रकारान् शुल्बसूत्रोक्तरी
त्या — दिभिः श्लोकैराह शुल्बसूत्रोक्तरित्यात्र प्राचीसाध्या अवा — वात्॥ अथ चोज्जयनीक्षेत्रादुदीच्यां कृत्ति
कोदायात्॥ २॥ तथा वोज्जयनीक्षेत्राद्याम्यत्वाष्टानिलांतरात् युगमात्रोदितेतारे चित्रा — त्योश्च पूर्वतः ४॥
सुधीरंजनयंत्रोक्तमार्गेणैवध्रुवतारके ताभ्यां — लंबितोलंबो भूदृष्टो तत्र चिह्नयेत्॥ ५॥ चिह्नाभ्यां दक्षिणो
द — चसूत्रं तत्र प्रसारयेत् तन्मध्यादुक्तवन्नमस्योन्नमुखात्स्वाकप्रजापते॥ ६॥ यद्वा पुष्पोदयात्प्राची
श्रवणाच्च युक्तितः चतुर्हस्तोदिता — याम्यक्षात्प्राचीप्रसाधनं॥ ७॥ सामानवलंयं पातिपंत्रभागे यदा
तत्रलंबप्रभा प्राची सौम्यगोलरवो सति॥ ८॥ यद्वा गणितमा — दिगंशेभ्यश्च यंत्रतः अथवार्कापमांशेभ्यो भाग्राद्ग
णितमा — ॥ ९॥ प्राक्साधनस्य मार्गो विसंक्षेपात्सूचितामया दिग्लुढक्षे — मत्युस्तस्मात्प्राचीं प्रसाधयेत्॥ १०॥
सुगमार्थाः श्लोकाः॥ तत्र श्लोकक्रमेण कर्तव्यपदार्थः कथ्यते॥ तथा च शुल्बसूत्रं॥ समे शंकुं निखाय संकुसंमित
यारज्ज्वा मंडलं परिलिख्य तत्रलेखयोः शंकुच्छाया निपतति तत्र शंकुं निहंति सा प्राची इति॥ शंकुश्च द्वादशांगुलः
पृथुमूलः सूक्ष्माग्रः॥ शंकुप्रमाणात्किंचिदधिकव्यासार्धेन समभूमौ शंकुच्छायाप्रवेशार्थं पूर्वाण्हे घृतं कृत्वा मध्ये

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

शंकुं निधायेति विशेषोऽन्यत्सुगमं मध्याह्नेऽपि कुचिद्देशे समौ यो पुष्यमाघयोः ॥ शंकुमानप्रमाणवत्ते शंकुमानविशत्यलभि
त्यतः किंचिदधिकशंकुप्रमाणसूत्रेण कर्कटकेन वा वृत्तमिति ॥ ध्रुवात्मकसाधनप्रकारः सूच्यते ॥ नलिकाग्रोत्तसूत्रांतो
समोऽग्रबध्धलंबकः ॥ ध्रुवं विधानलामध्याद्भूस्पर्शेऽन्दिगुतरा ॥ यंत्रस्माज्जोर्ध्वरंध्रेण केंद्रोर्ध्वरंध्रमार्गतः ॥ ध्रुवं विधानुकेंद्रो
र्ध्वो यंत्रप्रांतस्थलंबकः ॥ भूस्पर्शे चांकयेत्तत्रक्ष्माधःप्रांतात्तथांकयेत् ॥ निष्पा यमत्स्यो तन्मध्यं तन्मुखाद्दिग्दि
कुभवेदिति ॥ मत्स्यनिष्पादनमेवं ॥ मध्यचिन्हाद्दुभयतो गुलमाने च चिन्हये ॥ पुनस्तुर्यां ४ गुलेचैवं ताभ्यां कर्क
टकेन मम ॥ मध्यमुद्धृत्य तच्चिन्हाद्दत्तार्धाभ्यां झषद्वयं ॥ तन्मुखसूत्रदानेन प्राग्वादग्वात्सजुर्भवेत् इति मत्स्यनि
ष्पत्तिः ॥ अथवा उज्जयिन्यां क्षेत्रादुत्तरदेशे युगमात्रोदितकृत्तिकानक्षत्रोदयमेवोक्तरीत्या प्राक्साध्येति ॥ षडशीतियु
गमितिभुन्वोक्ते ॥ षडशीत्यगुलप्रमाणं युगमित्यर्थः ॥ तथा ऊर्ध्वो जयनीदक्षिणदेशे चित्रास्वात्योः पूर्वस्यां यु
गमात्रोदितयोरंतरालात्प्रागेवं साध्या ॥ सुधीरंजनयंत्रं यथा ॥ यंत्रं कुर्याद्धातुजं दारुजं वा पद्माकारं दीर्घवृत्तस्त्व
कहस्तं ॥ दीर्घे वाक्याः षडभागाः समानाः कस्मिंश्चिद्वाप्यन्ययंत्रस्य कुक्षौ ॥ १ ॥ हस्ताभ्यां तद्यंत्रतुल्यांतरेक्ष्णोर्ध
त्वा यंत्रं चैकेन नेत्रेण निमिल्य ॥ पश्येदर्थौ द्वौ यथा गुरुयुग्मच्छिन्नौ स्तस्तन्मध्यगा वेधजांशा इति यंत्रं ॥ अत्र यंत्रतुल्यान्य
ऋजुकाष्ठं पट्टिकावा सकिलायंत्रमध्यगतरंध्रे प्रोक्ताकार्या ॥ प्रोतपट्टिकां चिबुके स्थाप्य हस्ताभ्यां तद्यंत्रं धृत्वा
एकेन नेत्रेण निमील्य यथा गुरुयुग्मच्छिन्ने तारके भवतस्तथा वेधताभ्यां गुरुच्छादिततारकस्थानाभ्यां द्विसूत्रां
तप्रबध्धप्रलंबितलंबो यद्वा यंत्रप्रांतबध्धलंबको भूस्पर्शे यत्र भवतस्तत्र चिन्हयेदन्यत्सुगममिति ॥ यद्वा प्राच्यां
चतुर्हस्तोदितासुष्यात्स्रवणाद्वा युक्तितः प्राग्वत्प्राग्साध्येति ॥ अथ च समानगुलयज्ञानं यंत्रचिंतामणौ ॥

यथाक्रांत्यर्कयास्पृशति नभसश्चाक्षभागाय पट्टी यस्मिंकेंद्रादुडुपतिभुवि यस्सिंजिनीतत्समायां ॥ सौम्ये गोले समवलयगे सा
यतंगेन तज्ज्या सूर्याग्रेस्यात्कथितवदतः शंकुभाकर्णनाम्न इति गुरुमुखात् यंत्रचिंतामणिपठणं विनानज्ञायते ॥
अत्र चायं प्रकारः ॥ सूचितइति ॥ यद्वा गणितमार्गेण दिगंशेभ्य इत्यस्यायं प्रकारः ॥ सिध्धांतरहस्ये यथा ॥ द्युमान
खयुगणं ३० तरंशिव ११ गुणं दिनेत्माधिकेह्यपागुदक्कथानुदिग्भवति यंत्रभागापमः ॥ वसु ८ घ्नमयसंस्कृतिर्नव
ति ९० यंत्रभागांतरोद्भवा अपमहृत्ततो भुजलवादिगंशाः स्मृताः ॥ अत्र यंत्रभागापमस्तु नित्यमनुत्कदक्षिणयव
अयनांशानयनं यथा ॥ षट्द्वि ६२ षडिद्भूदधा ४ द्वि २ कृ १ भिरर्धैः खटभुजांशदिनाश १५ मितेक्यं ॥ शषहतेष्टदि
नां १५ शयुत्तवांशाय्यपमसुखसंव्यवहृत्यै इति ॥ अत्र तत्कालयंत्रभागानामेवापमः कार्यः ॥ अत्र खटाभाद्यंत्र
भागाएव भुजांशा ज्ञेयाः ॥ एते षडांशिभिः कंतेः षड्भिरर्धैर्दत्तैः कांतांशखंडकैरयनांशानयनं ॥ अन्यत्सुगमं
ततो भुजलवादिगंशा इत्यत्र भुजलवानयनं यथा ॥ ततो दलानि शोधयेत्तिथि १५ घ्नशेषमेष्यहृत् ॥ तिथि १५ घ्नसु
ध्यसंख्यया युतं भवति दोर्लवा इति ॥ तत इति अपमांशेषु प्रोक्तखंडकशोधनं ॥ दोर्लवाएवादिगंशाः ॥ एष्वंशेषु तुरीययं
त्रे यदा सूर्यो भवति तस्मिन्काले तुरीययंत्रे प्राचीनानायभुविकथं धार्यमित्यपेक्षायां यंत्रधारणप्रकारो यथा ॥ समभु
वि निहिते तुरीययंत्रे स्पृशति यथा चादिगंशकाग्रे केंद्रे ॥ अवलंबबिभोतकेंद्रसंस्थे षीकाभाचादिशोथ यंत्रगास्युरिति
यस्मिंकपाले सूर्यो भवति तत्संमुखं यंत्रस्य केंद्रं कृत्वा समभुवि उत्तानं स्थापयेत्ततो यादृक्कादिगंशास्तादृक्को यंत्रभागपं
क्त्यादिगंशागण्याः तदग्रे चिन्हं कुर्यात्तत्तद्दिगंशकाग्रमित्युच्यते ॥ सूक्ष्मरज्जुप्रांतबध्धलंबको वलंबः सो वलंबो यंत्रोपरि पतः
सन्नतइज्जुच्छाया दिगंशकाग्रे केंद्रे यथा युगपत्स्पृशति तथा धार्यमुतो थवा केंद्रसंस्थे षीकाग्रादिगंशकाग्रे स्पृशति ॥ ईषी

कासूक्ष्मरज्जुशलाकायंत्रकेंद्रस्थेत्यर्थः॥ यंत्रगादिशस्युरिति ॥ इतिदिगंशेभ्यः प्राक्साधनं॥ अथवाकीपमांशेभ्यइत्येतदये
स्पष्टंवक्ष्यति॥ इतिप्राक्साधनमार्गः संक्षेपेणसूचितः॥ स्पष्टार्थमन्यत्॥ अथतत्कालप्राचीसाधनमाह॥ प्राचीसाधन
मार्गविबहवः सेषुनिनरं॥ तत्कालप्राक्प्रसिध्यैचब्रुवेसूर्याद्यशंकुतः॥ ३३॥ स्पष्टार्थः॥ अथतत्कर्तव्यमाह॥ तत्काला
र्कसायनस्तद्भुजांशास्तत्क्रांत्यंशास्तत्क्षक्कर्णेननिघ्नाः॥ शंकुछायाकर्णनिघ्नाः॥ पुनस्त्रैरेखेष्वग्र्या ३५० भाः सूर्यदिक्
स्याद्भुजसः॥ ३२॥ द्विघ्नायाच्यक्षप्रभासंस्कृतोयंदेयोभाग्राज्येवपूर्णोयमोदक॥ केंद्राच्छंकोर्भाप्रमाणेनवृत्तेप्रा
क्सूत्रंस्यात्केंद्रबाह्वर्धगामिइति॥ ३३॥ तत्काब्दार्कसाधनंमुहूर्तमार्तंडे॥ संक्रांत्यंतरहोहृताद्दिनगणाद्राशंभपूर्वोरवि
र्मेषाद्यातमयुगिति॥ अनेनतात्कालिकार्कः कार्यः॥ सायनः अयनांशैर्युक्तः॥ वेदाब्ध्यब्ध्यु ४४४ नितेशाकेषष्ट्या ६० भा
अयनांशकादिति॥ तद्भुजः॥ न्यूनंभुजः स्यात्त्र्यधिके नहिनंभार्धेचभार्धादधिकंविभार्धं॥ नवाधिकेनोनितमर्क
भंचेत्यनेनश्लोकेनसायनार्कस्यभुजः कार्यः॥ राश्यादिकभुजःस्यांशाः कार्याः॥ यथाभुजराशयस्त्रिंश ३० द्विगुण्याअ
धांशेयुक्ताः संतः तत्भुजांशाभवंति॥ तत्क्रांत्यंशाः तेषांभुजांशानां॥ षट्षडिषूदधिदृक्भिरर्धैः ६।६।५।४।२।३ खेटभु
जांशादिनांश ३५ मितेक्यंमितेक्यं॥ शेषतेष्यादिनि ३५ शयुतेवांशाधुपमः सुखसंव्यवहृत्यैइत्यनेनतत्क्रांत्यंशाः कार्याः॥ ते
अक्षकर्णैनिघ्नाः॥ अक्षकर्णोयथा॥ अक्षछायावर्गतत्वां २५ शयुक्तामार्तंडा १२ स्यादक्षकर्णोगुलरिरिति॥ अक्षछायाअ
क्षप्रभेत्यर्थः॥ तत्वांशानामगुलत्वंगुलत्वान्मार्तंडेषुद्वादशसुयोज्याः॥ अनेनाक्षकर्णेनतेक्रांत्यंशाःगुणाःनयोः एथ
क्पृथक्समद्विघातः कृतिरुच्यते॥ इत्यनेनकृतीकार्यापतयोर्योगात्पदंकर्णोभवतित्यत्क्रांत्यादिषमादित्यादिनाश्लो
केनपदानयं॥ अयंशंकुछायाकर्णः॥ यद्वास्थापितशंकुयात्रंकुभायकृतचिन्हपर्यंतंधृतारज्जुःकर्णोभवतिसतुशंकुगु

॥३॥

णेरवमेयः॥ अनेनकर्णेनत्रयुणनीयाइत्यर्थः॥ ततःरेखाग्र्या ३५० भाःरेखाग्निभिर्भाजिताःसंतःसूर्यदिक्भुजःस्यात्॥सायना
र्कदिक्भवति॥ सौम्यदक्षिणगोलस्थसूर्यवशात्तद्दिक्ज्ञेयः॥ मेषाषडुत्तरेगोलस्तुलाषट्कंतुदक्षिणइति॥ सद्विघ्ना
याच्यक्षप्रभासंस्कृतः कार्यः॥ अपाचिचासावक्षप्रभाचेतिव्युत्पादनं॥ द्विघ्नाच्यासावपाच्यक्षप्रभावातचेति॥ अक्ष
भायानित्यंदक्षिणदिक्कादपाचीत्युक्तं॥ द्विगुणीताक्षप्रभयासभुजः संस्कार्यइत्यर्थः भुजाक्षप्रभयोरेकदिक्कयोगो
ऽन्यदिक्कतरमितिसंस्कारः॥ अंतरंस्फेटनं॥ यत्रानंकृतंसतयत्रोर्वरितंतद्दिक्भुजः स्पष्टः॥ ततःशंकोःकेंद्रात्स
काशाद्द्वाप्रमाणेनशंकुछायाग्रकृतचिन्हप्रमितेनकर्कटकेनसूत्रेणवाकृतेवृत्तेवृत्तमंडले अयंस्पष्टोभुजोगुल
मकोभाग्रातशंकुछायाग्रचिन्हात्ज्येवज्यावत यमोदक दक्षिणोदक यथाभवतितथापूर्णः संपूर्णोवृत्तरेखास्पृशेत्
यः॥ भुजप्रमितयारज्वादेयइत्यर्थः॥ तत्रभुजार्धचिन्हंकुर्यं॥ तत्रकेंद्रबाह्वर्धगामिप्राक्सूत्रंस्यात्ततत्रप्रसारित
सूत्रंशंकुकेंद्रभुजार्धचिन्हंचयथास्पृशतितथाप्रागपरंदेयमित्यर्थः॥ इतिप्राक्साधनं॥ इदंप्राक्सूत्रमंडपसा
धनमाह॥ समायांसाधितायांशुध्यायांभुविमंडपं॥ चतुरस्रोक्तरीत्यैवकुर्यात्संपूज्यविघ्नपं॥ १४॥ वक्ष्यमाणच
तुरस्रोक्तरीत्याकर्तव्यतयाद्विघ्नायामप्रमितमितमिश्लोकोक्तयेत्यर्थः॥ स्पष्टार्थमन्यत्॥ अथाधममध्यमोत्तममंडपप्रमा
णमाह॥ अधमोदशहस्तस्यात्मध्योद्वादशहस्तकः॥ उत्तमःशोडशारत्नियथायोगंसमाश्रयेत्॥ स्पष्टार्थः॥ यथा
योगमिति॥ यथायुज्यतेभूम्यवकाशानुसारेणएतन्मध्येएकःपक्षोंगीकरणीयइति॥ ग्रंथांतरे॥ अन्यमतांतरंय
था॥ द्वादशप्रमितेर्हस्तैः कनिष्ठोमंडपस्मृतः॥ मध्योमनु १४ मितैर्हस्तैः श्रेष्ठोऽष्टादश १८ भिस्मृतः तुलापुरुष
दानादौ विंशत्या २० कर संमितः॥ कूटमंडपसंज्ञास्यकला १६ द्वादशा १२ कपिचेति॥ रामवाजपेयिभिरपिअ

धममध्यमोत्तमविषयेपक्षद्वयमुक्तं॥ एवंचतुरस्रोक्तरीत्याचतुःकोणंमंडपंसंसाध्यतत्रचतुर्षुभुजेषुस्तंभारोप
णार्थंसूत्रैस्थानचिह्नान्याह॥ मंडपप्रतिमांरज्जुंविभागांभागचिह्निति॥ चतुर्दिक्षुप्रसार्येषुस्तंभांश्चिह्नेषुरो
पयेत्॥ ३६॥ मंडपपरिमाणंरज्जुंत्रिधाविभज्यविभजनभागेषुस्थानेषुचिह्नितांकुर्यात्॥ एवंतांभूतांरज्जुंचतुर्दि
क्षुप्राग्याम्यापरोत्तरमंडपचतुरस्रभुजेषुसंप्रसार्यैषुचिह्नेषुस्तंभानुरोपयेत्॥ स्तंभारोपणंस्वयंवक्ष्य
ति॥ अथमंतुचिह्नस्थानेषुवटाःकार्याः रज्जुप्रांतगताःकोणाएवचिह्नानितेष्वपिकोणेषुवटखननंस्तंभा
र्थंकार्यं॥ तत्रैकभुजस्थमध्यचिह्नाभ्यांतत्संमुखभुजस्थमध्यचिह्नपर्यंतंगैरिकयाचूर्णेनवाप्रभूतरज्ज
स्फालनेनसूत्रदानंतथैवतरयोर्भुजयोरपि॥ एवंनवधाक्षेत्रंभवति॥ तत्रमध्यचतुरस्रस्थाने किंवेदिंकुर्यात्उत्त
कुंडंकुर्यात्तत्रायेनिर्णयंवक्ष्यति॥ मध्यचतुरस्रेकोणेषुपिस्तंभनिवेशनस्यवक्ष्यमाणत्वात्कियत्प्रमाणास्त
भाःकियत्प्रमाणमध्यस्तंभनिवेशनस्थानंकियत्प्रमाणेणभूमिगास्तत्प्रमाणमाह॥ मध्यस्तंभांतरान्मध्येचतुस्त
भांनिवेशयेत्॥ पंचहस्ताबहिःपक्षावष्टाहस्ताश्चमध्यत॥ ३७॥ सचूडाःपंचमांशेनभूमिगास्तेषुवह्निका
सरंध्रविन्यसेन्मध्येकमलस्योद्धितिंसृजेत्॥ ३८॥ चतुरस्रमंडपभुजस्थमध्यस्तंबस्थानेद्वौतयोर्यदंतरंप्रमाणं
समध्यत्रिभागःतेनप्रमाणेनमध्येमंडपक्षेत्रमध्येचतुःस्तंभान्निवेशयेदारोपयेदित्युपदेशः॥ तत्रारोपंचहस्ता
द्वादशस्तंभाबहिःपंक्तौआग्नेयकोणादारभ्यस्तंभावटेषुप्रदक्षिणक्रमेणनिवेश्याःरोप्याः॥ ततोमंडपक्षेत्र
मध्येमध्यस्तंभांतरप्रमितमध्यचतुरस्रकोणेष्वग्नेयादिष्वष्टहस्ताश्चत्वारःस्तंभानिवेश्याः॥ एतएवास्य
श्लोकस्यांतर्भावान्नवधाक्षेत्रप्रकल्पनंप्रथममेवसूत्रदर्शितं॥ कथंभूताःस्तंभाःसंचूडाःशिखाभाजःस्वपंच

मांशेनभूमिगाःस्तंभंपंचधाविभज्यमूलभागस्थैकांशेनभूमिगताःकार्याः॥ आग्नेयाकोणादितिकथं॥ उक्तंचवा
स्तुशास्त्रे॥ अग्निकाष्ठतुयज्ञस्ययज्ञोग्निरुच्यतेबुधैः॥ यज्ञोवसतिकाष्ठेवैतद्दिशिप्रथमंसदा॥ न्यसेत्काष्ठम
यस्तंभःकाष्ठकृत्येषयंविधिरितिवचनात्स्तंभप्रतिष्ठापूजनमप्याग्नेयकोणादेवतिषुवह्निकास्तेषुषोडशस्तं
भाग्रचूडासुवह्निकाःसरंध्राःविन्यसेत्॥ उभयतोरंध्रद्वयवतीतिर्यक्काष्ठानिवह्नीरव्यानिरुजूनिपट्टीरूपा
णिस्तंभशिखमुप्रोतमायानीत्यर्थः॥ मध्येकमलस्योद्धितिंसृजेत्॥ कुर्यात्सायथामध्यस्तंभचतुष्टयस्थ
वह्निकामध्यगतरंध्रप्रविशितस्फोटितवेणुयष्टिकाचतुष्टयाग्रेषुघटितकाष्ठमयकमलगतरंध्रचतुष्टयंप्रोतयि
त्वाकमलोद्धितिं॥ अथाधममध्यमोत्तममंडपेषुप्रतिदिशंदिक्चतुष्टयेद्वारविस्तृतिप्रमाणमाह॥ अधमेप्रतिदि
ग्द्वारंद्विकरायतिकंस्मृतं॥ मध्यमोत्तमयोस्तच्चवेदाष्टांगुलसंयुतं॥ १९॥ अधमेकनिष्ठमंडपेप्रतिदिग्द्विशंदि
शंप्रतिइतिप्रतिदिक्॥ दिक्चतुष्टयेद्विकरायतिकंद्विहस्तविस्तृतंद्वारंस्मृतमुक्तंमुनिभिरितिशेषः॥ तच्च
द्विकरंमध्यमोत्तमयोर्मंडपयोःक्रमोद्वेदाष्टांगुलसंयुतंकुर्यात्॥ मध्यमेचतुरंगुलयुक्तद्विकरं॥ उत्तमेअष्टां
गुलयुतमिति॥ तद्यथास्तंभपंक्तिरेखायांदिक्सूत्रमुभयतोऽर्धतयाद्वारकाष्ठारोपणार्थंद्वारविस्तृतिप्रांतयोश्चि
ह्नंकुर्यात्॥ अत्रद्वारोच्चत्वंकथंनसूचितंतच्चउपरिवह्निकातलकतिर्यक्फलकदर्शनादेवज्ञायतेअतस्तूच्चत्वन
सूचितंइतिभावस्तास्मादुच्चत्वंवह्निकापर्यंतमेव॥ अत्रद्वारविस्तृतीप्रांतयोःकाष्ठारोपणमपिनसूचितं॥ रंध्रतु
द्वारमुच्यते॥ तच्चोभयपार्श्वार्धभागेषुसंरोधनतयाद्वारंतोसधते॥ तस्माद्विस्तृतिप्रांतचिह्नेषु॥ तोरणोक्त
काष्ठानिस्तंभपरिमाणानिप्रतिद्वारंस्तंभवद्रोपणीयानिइतिभावः॥ उक्तंचग्रंथांतरे॥ तोरणोक्तास्तुयाःस्ता

खास्तभिरेवतुकारयेत् ॥ द्वाराणि मंडपस्यैव स्तंभ पंक्तौ च स्तंभवदिति ॥ स्तंभवदिति द्वारकाष्ठानां पंचहस्तप्रमाणत्वं पंचमांशे
नभूमौ रोपणत्वं च ज्ञेयमिति ॥ अधममध्यमोत्तममंडपेषु द्वारोच्चतात्रमाणमेकमेव स्तंभसंबंधत्वात् ॥ अथ तोरणद्वार
स्य विशेषप्रमाणमाह ॥ अश्वत्थोदुंबरौ पुष्पवटशाखाश्च पूर्वतः ॥ पंच ५ षट् ६ सप्त ७ हस्ताः स्युः अधमादिषु कीर्त्तिताः ॥२८॥
द्वार्षट्टेहे निखातव्ये स्तंभवत्पंचमांशकैः ॥ द्वाराधिकानि तन्मूर्ध्नि वह्निवत्फलकान्यपि ॥ २९ ॥ पूर्वतः पूर्वयाम्यापरोत्तरेषु क्र
मतः अश्वत्थोदुंबरपुष्पवटानां सरलायाः शाखास्ताः अधममध्यमोत्तममंडपेषु क्रमात् पंचषट्सप्तहस्ताः प्रकीर्त्तिताः
उक्ताः ॥ अधमे पंचहस्ताः मध्यमे षट्केराः उत्तमे सप्तहस्ता इति ॥ तासां निखननं रोपणं कथं कर्त्तव्यं ॥ द्वार्षट्टेहे इति ॥ द्वार्षट्टेति
सामीप्यसप्तमी ॥ अनेन मंडपद्वारेषु अन्यद्वारांतरमुपलक्ष्यते ॥ तोद्वारनिकटं द्वारसंलग्नमिव द्वारांतरं कर्त्तव्यमिति ॥ ए
तस्य नामभेदो मत्स्यपुराणे यथा ॥ द्वारेषु कार्याणि च तोरणानि चत्वार्यपि क्षीरवनस्पतीनामिति ॥ तोरणास्त्री बहिर्द्वारमित्यभि
धानात् ॥ तोरणशब्दः अस्त्रिस्त्रीलिंगवाचको न भवति पुंलिंगनपुंसकवाचक एव ॥ तोरणशब्देन बहिर्द्वारमभिधीयते ॥ द्वा
रं बहिरिति बहिर्द्वारं ॥ द्वार्षट्टेति सामीप्यसप्तमी बहुवचनात् ॥ पूर्वोक्तमंडपद्वारेभ्यो बहिर्भागे द्वारसंलग्नमिव अन्यद्वारं तोरणाख्यं क
र्त्तव्यमिति पृथगुपदेशः अतएव तोरणद्वारस्य मानभेदः ॥ इदं तोरणद्वारं द्वारागं ॥ यथा कंठमेखलादिभिरंगैः कुंभस्य सांगता
तथा तोरणाख्यद्वारेण द्वारस्य सांगतास्यादिति ॥ तत्कर्त्तव्यपदार्थो यथा ॥ मंडपद्वारेषु स्तंभवदिति सचूडत्वमपि स्वस्वचि
स्वस्वप्रमाणपंचमांशेन निखातव्ये ॥ द्वाराद्बहिः द्वारविस्तृतिमुभयतः प्रति द्वारं द्वे द्वे शाखे स्वस्वपंचमांशेन भूमौ द्वा
रसंलग्नतया रोपणीये इत्यर्थः ॥ पूर्वद्वारे अश्वत्थशाखे ॥ दक्षिणद्वारे उदुंबरशाखे ॥ पश्चिमे पुष्पशाखे ॥ उत्तरद्वारे
वटशाखे ॥ पुष्पोजटीवृक्षः ॥ तन्मूर्ध्नि तासां चूडासु वह्नीवत्सरंध्राणि फलकानि द्वारविस्तृतिप्रमाणादधिकानि द्वार

काष्ठानि जातोरणानि तोरणानि चत्वार्यपि क्षीरवनस्पतीनामिति ख्यानि यद्वीस्वरूपाणि अपि शब्दाद्रोपणीयानि प्रो
तनीयानीत्यर्थः ॥ अधमे द्विहस्तं तिर्यक्फलकं ॥ मध्यमे षडंगुलवृद्धिरुत्तमे द्वादशांगुलीवृद्धिः ॥ फलकस्येति रामवा
जपेयिमतेन अत्र तिर्यक्फलकस्य द्वारविस्तृतिप्रमाणादधिकत्वमेवोक्तं ॥ फलकानामुभयप्रांतयोर्द्वारशाखाचूडा
प्रवेशार्थं रंध्राणि संति तानि द्वारविस्तृतिप्रमाणाद्यद्यधिकानि तदा उपरि द्वारविस्तृतिमानस्य न्यूनतास्यादतोऽ
धीकानीत्युक्तं ॥ तस्माद्द्वारविस्तृतिमानाधिकफलककाष्ठे विस्तृतिमानं मध्ये संरक्ष्य तद्बाह्ये मानसंलग्नमुभयतो
रंध्रकरणं तस्मिन् द्वारशाखाचूडाप्रवेशेन न शाखांतर्भागो विस्तृतिमानस्य एव भवति तेन द्वारस्य दीर्घचतुस्रतासमा
नास्यादित्यतोऽधिकपदस्यांतर्भावः सूचितः ॥ अधमे तोरणद्वारोच्चत्वं द्वारसममेव ॥ अथ फलकोपरि आयुधारोपणं मं
डपाध्यक्षस्य चाह ॥ स्वदेवतायुधानीद्वारमूर्ध्नि सुयोजयेत् ॥ सारद्रुममयाधोमंडपोपकटादिभिः ॥२९॥ स्वशब्देन यथेष्टदेवता
राधनार्थं मंडपस्तत्तन्मंडपद्वारमूर्ध्नि सुतत्तद्देवतानामायुधानि तोरणफलकमध्यभागगतरंध्रेषु योजयेत् ॥ वैष्णवया
गे वास्तुशास्त्रोक्तं वचनं ॥ मस्तके द्वादशांशेन शंखचक्रदरांगभृत् ॥ आगादिक्रमयोगेन न्यसेत्तेषां स्वदारुजमिति
फलकानां द्वादशेनायुधकरणमित्यर्थः ॥ शैवे तु पिंगलवचनं ॥ मूलेन चिह्नीताः कार्या द्वारशाखास्तु मस्तके ॥ शूलं
नवांगुलं दीर्घं तूरीयांशेन विस्तृतिः ॥ ऋजुर्वै मध्यभंगं स्यात्किंचिद्वक्रं तु पक्षयोः ॥ प्रथमे तत्समाख्यातं द्व्यंगुलं रोप
यितथा ॥ शेषाणां द्व्यंगुलावृद्धिर्वैश्यांगुलवृद्धितइति ॥ प्रथमे इति अधममंडपे ॥ अथानंतरं एवं भूतः सारद्रुममयो मंडपः द्वारवर्जं परितः उपरि च कटादिभिरिति ॥ सारद्रुमास्तु जंबूमधूकशालतिंदिपादयस्तत्काष्ठमयो मंडपकार्यः तेषां ऋजुत्वात् दृढत्वाच्च ॥ ॥ अथ

मंडपमध्यभागे किं वेदिः कार्या किं कुंडं कर्तव्यं इत्यत्र निर्णयमाह ॥ होमप्रधानके कुंडं चतुःस्तंभांतरे खनेत् ॥ अन्यत्र मध्ये वेदिः स्यात् चतुःस्तंभांतरा
यथा ॥२३॥ स्वाखिभागे विस्तृतात् तस्याः पूर्वादौ कुंडसंस्थितिः ॥ पदांतरे क्रमादष्टौ नवमं चेशपूर्वयोः ॥२४॥ यद्यद्धोमप्रधानात्मकं कर्म तत्र तत्क
र्मणि मंडपमध्यत्रिभागगतचतुस्तंभस्तेषामंतरे मध्ये देशे कुंडं खनेत् ॥ कुर्यात् ॥ अन्यत्र तुलापुरुषादिदानविधौ दानस्य प्रधा
नत्वान्मध्ये वेदिः स्यात् चतुःस्तंभांतरायात्ताच्चतुःस्तंभांतरप्रमाणेन विस्तृतेत्यर्थः ॥ तस्या कोणेषु स्तंभाः भवंति ॥ स्वाखिभागाद्वि
ताश्चतुर्थांशेनोच्छ्रा ॥ एवंविधा चतुःस्तंभांतरे वेदिः कार्या ॥ वेदिस्तु देवतपूजनार्थं पूर्वद्वारनिकटे कार्या ॥ इति दानखंडे ॥॥
धान्यपर्वतप्रधानत्वान्मध्ये पर्वत एव ॥ तस्याः वेदेः सकाशात् पदांतरे परितः ॥ पदमात्रं भूम्यंतरं त्यक्त्वा पूर्वादौ कुंडानां स्थितिः का
र्या ॥ पूर्वाद्यष्टदिक्षु वक्ष्यमाणचतुस्रयोन्यर्धचंद्रत्र्यस्रिवृत्तषडस्रिपद्माष्टास्रिकुंडानि मेखलायोनियोग्यानि सर्वाण्येकहस्त
निकार्याणि ॥ तत्र दहस्तमंडपे त्रिमेखलकुंडनिवेशने होमकर्तृणामुपवेशनस्थानं तस्मात् त्रिमेखलसमवेशाभावः ॥ मध्यमो
त्तममंडपयोः स्थलबाहुल्याद्यथा सौख्येन त्रिमेखलानि ॥ एवमष्टदिक्षु अष्टकुंडानि ॥ नवमं चेशपूर्वयोः ईशानपूर्वयोरंतराले न
वमं कुंडं कार्यमिति ॥ अयमुत्तमः पक्षः ॥ पंचमकुंडपक्षस्तु मध्यमः ॥ तत्र पूर्वादिचतुर्दिक्षु चत्वारि पंचमं ईशपूर्वयोरंतरा
लेऽ ॥ एककुंडिकनिष्ठः पक्षः ॥ तच्चैकं कुंडं वेदिपश्चिमभागे इति यथांतराक्तत्वात् ॥ अथ कति कति होमे किं किं कुंडमानं तत्तदाह ॥
स्वाष्टांशोनकरं कुंडं शतार्धे समधीयते ॥ स्वशोडशांशोनकरं शतहोमे विनियुज्यते ॥ २५ ॥ सहस्रायुतलक्षेषु प्रयुते कोटिहोमके ॥ कु ३
द्य २ च्च ४ यू ६ ष्ट ८ हस्तं स्यात् कुंडं तत्करणीं ब्रुवे ॥२६॥ करश्चतुर्विंशांगुलस्तस्यैवाष्टांशस्त्र्यंगुलाल्पकरस्तेनोनः करो यस्मि
न तत् त्र्यंगुलोनकरप्रमितं एकविंशत्यंगुलात्मकं कुंडं पंचाशदाहुतिकहोमे उक्तं । तथैव स्वशोडशांशोनकरं ॥ स्वस्य शोडशां
शः हस्तः षोडशांशः सार्धांगुलात्मकस्तेनोनः करो यस्मिन् तत् सार्धद्वाविंशं ॥२२॥ गुणप्रमाणं कुंडं शतहोमे उक्तं ॥ सहस्रहोमे

एकहस्तं चतुर्विंशांगुलं स्यात् ॥ एकहस्तक्षेत्रफलकमित्यर्थः ॥ अयुते द्विहस्तं द्विहस्तक्षेत्रफलकं ॥ लक्षे चतुर्हस्तं ॥ प्रयुते षड्हस्तं
कोटिहोमे अष्टहस्तं कुंडं ॥ क्षेत्रफलानि तु अंगुलैरेव जायंते गणितमार्गेण ॥ एतत्सर्वं गणितशास्त्रगम्यमेव ॥ अन्यमतांतरं
शारदातिलके यथा ॥ एकहस्तमितं कुंडं लक्षहोमे विधीयते ॥ लक्षाणां दशकं यावत्तावद्धस्तेन वर्धयेत् ॥ दशहस्तमितं कुंडं कोटि
होमे तु शस्यते इति ॥ एकहस्तं लक्षहोमे एतत् घृतपुष्पादिशीघ्रदाहकवस्तुविषयं ॥ कोटिहोमे यद्दशहस्तं तत् व्रीह्यादिस्थ
लद्रव्यविषयं ॥ कुंडस्य त्रिविचारस्तु प्रागेवोक्तः ॥ अथ तत्करणीं ब्रुवे ॥ करणीशब्देन रज्जुरुच्यते ॥ तथा च शुल्बसूत्रे रज्जुना
मानि ॥ करणी तत्करणी तिर्यग्मानी पार्श्वमानी अक्ष्णया तिरश्चीन इति ॥ अथ कुंडानां क्षेत्रफलतया द्विद्व्यादिष्टहस्तप्रमाणसूत्रमा
ह ॥ हस्तक्षेत्रफलं ५७६ स्वेष्टकरघ्नं परमस्य यत् ॥ इष्टसूत्रमिदं तेन चतुरस्रं प्रसारयेत् ॥२७॥ क्षेत्रफलं त्वंगुलैरेव जायते ॥
कृतिरेव क्षेत्रफलं ॥ समद्विघातः कृतिरुच्यते ॥ भुजकोटिघातः कृतिः ॥ इष्टाद्धोर्ध्वः स्यात् तस्य दिग्न्यादिशि तरोर्बाहुः ॥ त्र्यस्रे चतुर
स्रे वा साकोटिः कीर्तितात्तैरिति भुजपदकोटिः ॥ योकः स्वगुणितस्वस्य सा कृतिस्तस्य तत्फलमिति ॥ हस्तक्षेत्रफलं षट्सप्तत्यधि
कपंचशतं ५७६ इदं स्वाभीष्टद्विद्व्यादिकरघ्नं द्विद्व्यादिभिर्गुणितं अस्य यत् पदं तत् इष्टसूत्रं स्यात् ॥ स्वाभिष्टहस्तक्षेत्रस्य प्र
माणारज्जुरंगुलव्यंगुलात्मिका भवेत् ॥ तेन प्रमाणसूत्रेण अंगुलयवादिकेन चतुरस्रं प्रसाधयेत् कुर्यादिति ॥ मूलानय
ने भास्कराचार्याणां श्लोको यथा ॥ त्यक्त्वांत्याद्विषमात्कृतिं द्विगुणयेन्मूलं समेतद्धृते त्यक्त्वान्त्यकृतिं तदाद्यविषमान्मूलं
द्विनिघ्नं न्यसेत् ॥ पंक्त्यां पंक्तिहृते समेऽन्यविषमात्यक्तावशेषवर्गफलं पंक्त्यां तयवा ७ पंच ५ यूकास्त्रिद्विहस्तके ॥२॥ रूपवेदा १४
वेद ४ यवा पंच ५ यूकास्त्रिहस्तके ॥ अष्टवेदांगुलानि स्यात् प्रमाणं वेदहस्तके ॥ त्रिपंचाशत् ५३ पंच यवा ५ स्त्री ३ यू
काः पंचहस्तके ॥ नागेषवः ५८ षट् ६ यवाश्च त्रियूकाः सहस्रके ॥३॥ चतुर्यवैः समायुक्ता त्रिषष्टिः ६३।४ सप्तहस्तके

सप्तषष्टिः ६७ सप्त ७ यवास्त्वष्टहस्तेप्रमाणकं ॥ ४ ॥ नवहस्ते मितेक्षेत्रेद्विअंश ७२ गुलप्रमाणतः ॥ पंचाद्रयः ७५ सप्तयवा ७ यूकैका १ दशहस्तके ॥ ५ ॥ इत्थं गुलादिमानानिचैकतोदशहस्तकं ॥ क्षेत्रफलत्वनेनैवयथार्थस्यान्सशयः ॥ ६ ॥ एकहस्तादिदशहस्तपर्यंतं प्रमाणसूत्रमानान्यंगुलयवादिनिटिकाकारोक्तानिस्पष्टानिकृतानि

एकहस्त	द्विहस्त	त्रिह०	चतुर्ह०	पंचहस्त	षड्ह०	सप्तह०	अष्टह०	नवह०	दशह०
२४	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	६७ ७	७२	[illegible]

चतुर्विंशागुलात्मकैकहस्तचतुरस्त्रस्यक्षेत्रफलंशुल्बोक्तरीत्यानानाप्रकारेणोच्यते भुजकोटिघातेनेदंक्षेत्रफलं ५७६ यद्वाचतुरस्त्रमक्ष्णयापक्षियत्रिकोणद्वयंप्रकल्प्यतत्रलंबः षोडशि १६ गुलः सप्त ७ यवाः षट् ६ यूकाः अर्धमध्येतत्प्रमाणं १६।७।६ लंबगुणमित्यनेनजातंसाष्टाशीतिद्विशतं २८८ द्विगुणमितेतदेव ५७६ यद्वाचतुरस्त्रंमध्येप्राचमपक्षियान्यतरद्विभज्यपुरस्तात्पश्चोपरष्यादित्यनेनदीर्घचतुरस्त्रप्रकल्पनस्यैकोभुजोष्टाचत्वारिंशत् ॥ द्वितीयोद्वादशउभयोराहत्यानदेव ५७६ यद्वाइदमेवदीर्घचतुरस्त्रंअक्ष्णयापक्षियविपर्यस्येत्तरतउपधायतत्त्रिकोणंप्रकल्प्यतद्दंडोष्टाचत्वारिंशत् ४८ एवमनेकप्रकारःसंति ॥ इतिएकहस्तादिक्षेत्राणांप्रमाणसूत्रानयमुक्तेदानींचतुरस्त्रकुंडसाधनप्रकारमाह ॥ द्विघ्नायामसमितंद्विपात्र ॥ मजरसूत्रंदलेतद्दलतन्मकारस्य ध्येः कितमस्यपाशयुगलंशंकोः प्रमांतस्थयोः ॥ क्षिप्त्वाकृष्यतृतीयचिन्हकमपाकोदक्षिणेद्वितीयेखनेत्कुंकुपाशविपर्ययाच्चपुरतोवेदास्त्रिसर्वार्थदं २९ ॥ क्षेत्रसाधनार्थरज्जुलक्षणंशुल्बपरिशिष्टे ॥ अजीर्णाग्रंथिनीसूक्ष्मासमाश्लक्ष्णात्वरोमसा ॥ रज्जुर्मानाधिकाकार्याअश्वरोमसिकृता ॥ शाणीवाबाल्वजीवापिवेणवीवाविधियते ॥ रज्जुरुभयतःपाशात्रिवृत्ताङ्गकमेणि ॥ रज्जुर्मुञ्जमयीकार्याशाणैस्तुपरिमिश्रितेति ॥ अत्ररज्जुमानाधिकत्वंचपाबंधनार्थं ॥ पाशग्रंथीबंधनेरज्ज्वाकरर्षणंत्वादधिकत्वमुक्तं ॥ किंचिदधिकत्वस्यरज्जुप्रोतपाशग्रंथौसमावेशात् ॥ यथारज्जुभयप्रोतपाशबंधनेनक्षेत्रप्रमाणपरिमितामवति तथाकार्येत्यर्थः ॥ अथश्लोकार्थः ॥ द्विघ्नायामसमितं ॥ आयामोदीर्घ्यं ॥ एकहस्तादिक्षेत्रप्रमाणसूत्रं ॥ द्विघ्नश्चासावायामश्च

तेनमितेपरिमितं ॥ द्विगुणितक्षेत्रव्यासपरिमितेअजरन्नूतनं ॥ द्विपार्श्वद्वौपाशौयस्मिन्नतरज्जुप्रोतयोःकृतपाशं ॥ एवंविधंसूत्रंविधाय अंकितंचिन्हितंकार्यं ॥ कुत्रकुत्रेत्याह ॥ दलेद्विगुणसूत्रार्धेपुनःकुत्र ॥ तद्दलेतदार्धस्यदलेअर्धेचिन्हयेत्तद्दशंकुचिन्हंपुनःकुत्र ॥ तन्मध्ये ॥ तयोःकृतचिन्हयोर्मध्येचिन्हितं ॥ इदमाकर्षणचिन्हं ॥ एवंचिन्हितेसूत्रंकृत्वात्रस्यसूत्रस्यपाशायुगुच्छंप्रमांतस्थयोःशंकोःक्षिप्त्वारोप्य ॥ प्रमाणंप्रमाप्रमियतेक्षेत्रमनयासाप्रमा ॥ प्रमायाःअंतौप्रमांतौप्रमांतयोःक्षिप्तनस्तौप्रमांतस्थौतयोःकुंडकर्तव्यप्रदेशेप्राचीसूत्रेहस्तादिक्षेत्रप्रमाणरज्जुंदत्वाप्रमाणरज्जुप्रोतयोःपूर्वापरयोःशंकुनिखायपश्चादस्यचिन्हितसूत्रस्यपाशयुग्मंरोपितशंकोः ॥ क्षिप्त्वातृतीयचिन्हकंअपाकृदक्षिणतआकृष्यद्वितीयेचिन्हेशंकुंखनेद्रोपयेत् ॥ एवमुदक्च ॥ तृतीयचिन्हमुदगुत्तरतआकृष्यद्वितीयचिन्हेशंकुंरोपयेत् ॥ एवंक्षेत्रपश्चिमश्रोणिद्वयेशंकुंरोपयित्वापाशविपर्ययाच्चक्षेत्रपूर्वापरशंकोः ॥ पाशविपर्ययंयासेनपूर्वतःक्षेत्रपूर्वभागेचकारोदेवमेवप्रकारेणदक्षिणोत्तरांसस्थानेशंकुंरोपयित्वावेदास्त्रिभवेत्सर्वार्थदंसर्वकामनाप्रदायकंचतुरस्त्रक्षेत्रंस्यादित्यस्यफलमपिसूचितमितिश्लोकार्थः ॥ अस्यक्षेत्रफलंप्रागुक्तप्रकारेणज्ञेयं ॥ क्षेत्रफलंनामाकं ॥ फलनिष्पत्तावितिधातुः ॥ क्षेत्राणिफलंतियस्मिन्नतदिति ॥ अत्रतावद्धस्तक्षेत्रफलषट्सप्तत्यधिकपंचशतांगुलात्मकं ॥ एतावंत्यगुलप्रमाणानिक्षेत्राणियस्मिन्हस्तमितचतुरस्त्रादिक्षेत्रमध्येफलंतिनिष्पादयंतीति ॥ तत्तत्कुंडस्वरूपाणांगुलात्मकानिक्षेत्रफलंगुलसंख्याकानिक्षेत्राणिस्युरित्यर्थः ॥ अथयोनिकुंडमाह ॥ पंचांशंकुरुपुरतोदशांशयुग्मंश्रोण्योरुभयस्त्रधरमितेश्चतुर्लवेन ॥ खंडेदुदयुगधःसुतेषुरेतन्नाभंरवपतिकुंडमुद्धसद्भिः ॥ २९ ॥ अत्रप्रथमंहोमानुसाराद्यावत्प्रमाणंकुंडं ॥ चिकीर्षितंतावच्चतुरस्त्रंकृत्वापश्चादेतस्यश्लोकस्यकर्तव्यताकार्या ॥ ॥ चतुरस्त्रस्यसप्तपंचभिरंशभागद्विसंगृहीत्वाचतुरस्त्राद्बहिः पूर्वतःपूर्वभागेकृतप्राक्सूत्रेएव

तं पंचांशं कुरु कुर्विति शिष्यं प्रत्युपदेशः॥ पंचांशप्रमितेन कर्केन चिह्नं कुर्वित्यर्थः॥ पूर्वतश्चिह्नं कृत्वा तदनंतरं चतुरस्रस्य पश्चाद्भागश्रेण्यो दशांशयुग्मं कुरु॥ व्यासस्य दशांशभागं गृहीत्वा श्रोणितो वहिस्तिर्यक्सूत्रेदक्षिणतो दशांशं दत्वोत्तरतश्चान्यं दशांशं दद्यात् दशांशस्य पंचाशस्मार्द्धं भवति॥ एवं दशांशयुग्मं दत्वा तत्रोभयतः चिह्नद्वयं कृत्वा पूर्वभागाच्चिह्नात् श्रोणिचिह्नद्वयपर्यंतं सूत्रदानेन त्र्यस्रं त्रिकोणं स्यात्॥ एवं त्रिकोणं कृत्वा अस्य त्रिकोणस्य या अधरमिति मानं तस्याश्चतुर्थेन चतुर्थांशेन अधः॥ अधोभागे खंडेंदुद्वययुक्तं कार्यं॥ तद्यथा॥ अधरमिति चतुर्धा विभज्य समतया तत्र चिह्नानि कुर्यात्॥ मध्यचिह्नं तु प्राक्तत्र एव पतति मध्यचिह्नाद्दक्षिणोत्तरयोः अर्धयोर्मध्ये एकैकं चिह्नं कुर्यात्॥ एवं सर्वथा रतिर्यङ्मितेश्चत्वारश्चतुर्थांशा जाताः॥ तत्र दक्षिणार्धमध्यचिह्नात् चतुर्थांशप्रमितेन कर्कटकेन प्राचीसूत्रगतमध्यचिह्नमारभ्य चापधिं श्रोण्यं तं यावदधोभागे अर्धचंद्रवत् वृत्तार्धं चित्रयेत्॥ एवमुत्तरार्धमध्यचिह्नादपि इदं त्र्यस्रखंडेंदुद्वययुक्तं सद्योन्याभं कुंडं भवति॥ यत्तद्योन्याभं कुंडं सुतेषुः पुत्रार्थी रिन्वयति करोति अतस्तन्मध्ये तत्कुर्विति शिष्यं प्रति एतस्य योनिकुंडस्य फलं श्रुतिरपि सूचनमिति॥ अत्र क्षेत्रफलस्योपपत्तिरियं॥ हस्तमात्रं क्षेत्रं तावत्क्षेत्रं च्यते समलंबकं चतुरस्रं त्र्यस्रक्षेत्रे च जायते करणं १२ वदनसमासार्धं मध्यमलंबेन संगुणयेदिति श्रीधराचार्योक्तेः॥ योनिकुंडे उपरि त्र्यस्रे लंबांगुलानि अष्टाविंशतिः २८ षड्व्ययः ६ अधोभूम्यर्धं सत्रियं चतुर्दशांगुलं १४।३ लंबगुणितमेतज्जातं त्र्यस्रफलं सत्रयोदशा चतुःशती ४१३ अथ चान्यप्रकारांतरेण प्रउगं चतुरस्रं चिकीर्षन्मध्ये प्राचमपाछिद्य विपर्यस्यं तरत्तदुपधाय दीर्घचतुरस्रसमासेन समस्येहितिसुल्बसूत्रं प्रउगशब्देन त्रिकोणं सुल्बोक्त्या दीर्घचतुरस्रमेतत्स्यात् अस्मिन् क्षेत्रे भुजालंबमितः २८।६ द्वितीयोभूम्यर्धमितः १४।३ इति दृष्टं देवमेव ४१३ दीर्घचतुरस्रसमासेन समस्येहि एतस्यापि प्रकारस्तत्रैवोक्तो यथा॥ दीर्घचतुरस्रं समचतुरस्रं चिकीर्षन्मध्ये तिर्यगपाछिद्य अन्यतरद्विभज्येतरपुरस्तादुत्तरतश्चोपदध्याच्छेषभागं तु नासं पूरयेत्तस्योक्तो निर्हासः क्षेत्रात्क्षेत्रं निष्क्राशो निर्हासः

निर्हासोपि सुल्बोक्तो यथा॥ चतुरस्राच्चतुरस्रं निर्जिहीर्षन्यावन्निर्जिहीर्षितावदुभयतोऽपाछिद्य शंकुनिरासमपार्श्वमानीं कृत्वा पार्श्वमानीसंमितामष्टांशां तत्रोपसर्पं हरति ससभासेऽपछेदः साकरण्येषानिकृसिद्धति॥ अनेन प्रकारेणापि पूर्ववदेव फलं समायाति॥ एवं सुल्बोक्तरीत्या नानाविधक्षेत्राणां नानाविधक्षेत्रकरणं तस्मात् क्षेत्रफलानयनमस्ति॥ येन सुल्बसूत्रं गुरूपदेशतः सम्यक्तया सप्रत्ययमभिज्ञातमस्ति स एव नानाविधप्रकारेण क्षेत्रफलानयनं करीष्यति स लंबग्रंथबाहुल्यात्॥ एवमुपरि त्र्यस्रफलं कथितमधुना त्र्यस्रे अधोभागे वृत्तार्धद्वयस्य क्षेत्रफलमुच्यते॥ द्वयोरेकमेव प्रमाणं वृत्तार्धद्वययोगात् एकं वृत्तं प्रकल्प्य व्यासव्यासार्धमितं सप्तांगुलान्येकोयवश्चतस्रो यूकाः ७।१।१४ व्यासार्धविगुणगतिक्षेत्रफलं दशगुणान्मूलमित्यनेनीतं वृत्तफलं त्रिषष्ट्यधिकशतं १६३ अस्यार्धतया वृत्तार्धयोर्ज्ञेयमिति यद्वा पूर्णवृत्तव्यासस्य चतुर्दशांगुलं त्रिंशत्मकस्यास्य १४।३ परिधानयनं यथा वृत्तव्यासकृतेर्दिगुणेन मूलं च परिधिर्भवेदित्यनेनानीतो यं वृत्तपरिधिः॥ सत्रियं पंचचत्वारिंशदंगुलः ४५।३ परिधिगो व्यासपादो वृत्तक्षेत्रफलं भवेदित्यनेनापि फलं पूर्वमेव १६३ यद्वा यं वृत्तखंडं धनुः प्रकल्प्य व्यास्य जीवा सत्रियं चतुर्दशांगुला १४।३ धनुर्मध्यशरः सप्तांगुलः ससार्धैकयवः ७।१४ जीवाशरैक्यदलहतशरस्य वर्गो दशाहतं नवभिः विभजेद्व्यास मूलं प्रजायते कार्मुकस्य फलमित्यनेनानीतं कार्मुकस्य फलमेकाशीतिः सपंचयवा ८१।५ उभयधनुः साम्याद्वृत्तद्विगुणं तदेव १६३ त्र्यस्रफलवृत्तक्षेत्रफलयोरंतरमेतत् यद्वा खंडेंदुद्वययोगेन पूर्णं वृत्तं प्रकल्प्य। मंडलं चतुरस्रं चिकीर्षन्निष्कंभपंचदशभागान्कृत्वा द्वौ उद्धरेत् शेषः करणीति सुल्बोक्तरीत्या समचतुरस्रकरणी मानीय तद्वर्गस्तदेव फलं १६३। विष्कंभो वृत्तव्यासः करणीप्रमाणरज्जुः। त्र्यस्रफलखंडेंदुद्वयफलैक्येन वृत्तक्षेत्रफलं॥५७६॥ योनिकुंडे नानाप्रकारेणोक्तमिति॥ ॥अथार्धचंद्रकुंडमाह॥ ॥सिद्धां २४ शीकृतचतुरस्रमध्यसूत्रे पंचांशान

धरगतान्विहायतेन ॥ भागा १९ व्यंशकसहितेन वृत्तखंडस्कंधकैरिचयदले द्विहते सुभाया ३० शिद्धांशाः २४ कला
यस्मिन् तत् सिद्धांशीकृतं तच्च तच्चतुरस्रं मध्यसूत्रं च तस्मिन् सिद्ध इति चतुर्विंशति संज्ञा ॥ सिद्ध प्रतिमांशा इत्यर्थः
उक्तप्रमाणे भाहोसमचतुरस्रं विधायतन्मध्यसूत्रं समंतया चतुर्विंशतिभागं कृत्वा तस्मिन् सूत्रेऽधरगतान्यं चांशान्
विहाय स्वामार्जयित्वा तेना विशिष्टसूत्रेणैकोनविंशति १९ भागात्मकेन भागाष्टांशकसहितेन एकभागस्याष्टमांश
युक्तेन यथाधिकैकोनविंशत्यंगुलप्रमितेन सूत्रेण कर्कटकेन वा चतुरस्रस्य स्कंधौ धौ दक्षिणोत्तरांसयोरुपरि तिर्यक् सूत्र
दानेन दक्षिणोत्तरतः स्कंधवृद्धिर्भवति ॥ यथा स्वेच्छया कृतायां तस्यां स्कंधधौ दृस्तखंडं वृत्तार्धं रचयविरचय उक्तसूत्र
प्रमितेन कर्कटेन चतुरस्रस्य पृष्ठभागमध्यस्थितेन स्कंधधिसंलग्नं वृत्तार्द्धं भ्रामयेदित्यर्थः इदं दलं तु अर्धचंद्रकुंडं सु
भाय कल्याणाय भवेत् शुभे शुभा कर्तव्यमिति ॥ अत्र क्षेत्रोपपत्ति रुच्यते ॥ ॥ अत्र अर्धचंद्रधनुः ॥ ॥ धनुर्जीवाद्वियो
वाधिकाष्टत्रिंशदंगुला ३८।२ धनुषो मध्यशर एकोनविंशांगुलः सेकयनः १९।१ जीवाशरैक्यदलहतत्वरस्यवर्गदशाह
तेन वाप्तिः विभजेद्वा तत् मूलं प्रजायते कार्मुकस्य फलमित्यनेनानीयहस्तक्षेत्रफलं मर्धचंद्रकुंडस्य भवेद्ततः ५७६
यद्वा शर १९।१ एवव्यासार्धं प्रकल्प्य व्यासार्द्धवर्गद्वियनेनानीतफलस्यार्धं तदेवस्यात् यद्वा यथाधिकैकोनविंशत्या
१९।१ पूर्णवृत्तं प्रकल्प्यास्य व्यासो द्वियथाधिकाष्टत्रिंशदंगुलः ३८।२ अस्माद्वृत्तपरिधानयनं वृत्तव्यासदलतो दि
ग्घ्नात् मूलं च परिधिर्भवेद्द्वियनेन सद्वियवमेकविंशत्याधिकशतं १२१ परिधिः २ परिधिघ्नो व्यासपादो वृत्तक्षेत्रफलं भ
वेद्द्वियनेन वृत्तफलमानीय तदर्धं कृत्वा पूर्ववद्देव फलं ५७६ यद्वा मंडलं चतुरस्रं चिकीर्षुर्विष्कंभं पंचदशभागान् कृ
त्वा द्वावुद्धरेच्छेषः करणीति सुत्रोक्तैः ॥ करण्यावर्गः तदर्धं हस्तक्षेत्रफलं तदेव ॥ ॥ इत्यर्धचंद्रकुंडस्य फलानयनप्र
कारः ॥ ॥ ॥ अथ त्रिकोणवृत्तकुंडं च श्लोकेनैकेनाह ॥ ॥ व्यष्टांशदशपुरतो जिनां २४ शसूत्रे श्रोण्यो

रद्रशि इति वैरनुत्रिकोणं ॥ व्यासार्द्धं निजवस ८ भागभागनेन वृत्तं शांतिकृदुदितं सुशोभिकुंडं ॥ ३९ ॥ चतुर
स्रमध्यसूत्रे जिनांशीकृते चतुर्विंशधाकृते सति क्षेत्रस्य पुरतो बहिः ॥ प्राचीसूत्रे एव व्यष्टांशा दशभागा देयाः विग
तः एकभागस्य अष्टांशो येभ्यस्ते व्यष्टांशा दशभागा देयाः विगतः एकभागस्य अष्टांशो येभ्यस्ते व्यष्टांशा एवंभूता
दशभागाः पुरतो देया ॥ यथोनदशभागा इत्यर्थः चिन्हयेत् ॥ पूर्वे श्लोके भागाष्टांशकपदेनात्रापि एकभागस्याष्टमांश
इत्यनुवर्तनीयं ॥ ननु दशानामष्टमांशः अत्र कस्याष्टमांश इति नोक्तत्वात् कदाचिद्यथा भिन्नस्तु दशानामष्टमांशं
गृहीत्वा तेनोनदशभागान् पुरतः करिष्यति तदा क्षेत्रफलस्य न्यूनतास्यात् ॥ तस्माद्दशकस्यैवाष्टांशः अनुक्तेरुपपत्तेः
तिगणितशास्त्रोक्तत्वाच्च ॥ एवं दशांशान् पुरतो दत्वा श्रोण्योरर्धशः केवलदशानामर्धशः पंचपंचभागान् दक्षिणो
त्तरश्रोण्योस्तिर्यक्सूत्रे बहिर्दद्यात् तत्र तत्र चिन्हं कृत्वा पुरतश्चिन्हात् श्रोणिद्वयचिन्हपर्यंतं सूत्रदानेनैतत्त्रि
कोणं स्यात् वैरिनुक्तवैरिनाशकरं भवतीति फलश्रुतिः ॥ ॥ अत्र क्षेत्रोपपत्तिः ॥ ॥ अत्र मध्यलंबो यथा भवेत्
त्रिंशदंगुलः ३३।७ अधोभूम्यर्द्धं सप्तदशांगुलः १७।७ लं ॥ लंबगुणमेतत् हस्तक्षेत्रफलं ५७६ स्यादिति यद्वा
प्रउगं चतुरस्रं चिकीर्षन्मध्ये प्राक्तमपाछिद्य विपर्यस्ये सरतउपधायहीर्घचतुरस्रसमासेन समस्ये हितिसुत्रोक्ते
नापितदेव फलं स्यादिति ॥ ॥ इति त्रिकोणं ॥ ॥ अथोत्तरार्धस्य व्याख्या ॥ ॥ व्यासार्द्धमिति समचतुरस्र
स्य व्यासार्द्धं निजवसुभाग ८ भाकृकार्यं स्वकीयाष्टमांशेन व्यासार्द्धयुक्तमित्यर्थः अनेन प्रमाणसूत्रेण कर्कटेन
वा मध्यार्द्धसूत्रं भ्रामयित्वा वृत्तकुंडं स्यात् सुतरां शोभते तत्सुशोभि एतत्कुंडं शांतिकृत् उदितं उक्तं सुनिभिरिति
शेषः शांतौ क्रियते इति शांतिकृत् सर्वारिष्टप्रशमनकर्मणि वृत्तकुंडमुदितमिति अत्र क्षेत्रफलं अत्र सार्ध
त्रयोदशां १३।४ गुल प्रमाणकृतवृत्तव्यासः सप्तविंशांगुलः २७ वृत्तव्यासकृतेद्विघ्ना १० मूलं च परिधिर्भवे

हिसनेनास्य परिधिः सत्रियव पंचाशीतिसंगुलः ८५।३ यद्वा वृत्तव्यासे द्विनेत्र २२ घ्नेः द्वि७ भक्ते परिधिर्भवेद्दि
तिव्यासभागः सषड्यवः षडंगुलः ६।६ परिधिघ्नो व्यासपादो वृत्तक्षेत्रफलं भवेद्दिसनेनेदं हस्तक्षेत्रफलं
५७६ यद्वा व्यासार्द्धवर्गवर्गात् क्षेत्रफलं दशगुणान्मूलमित्यनेनापि तदेव यद्वा मंडलं चतुरस्रं चिकीर्षुर्वि
ष्कंभं पंचदशभागान् कृत्वा द्वाबुद्धरेच्छेषः करणीति सूत्रोक्तव्यासमं चतुरस्रीकरणीमानीयते तद्वर्गः क्षेत्रफलं
तदेव यद्वा वृत्तमध्ये तिर्यग्पाच्छिद्यैकं खंडं धनुः प्रकल्प्य व्यासस्य जीवा सप्तविंशतिः २७ धनुर्मध्यशरः सार्धत्रयोद
शांगुलः १३ जीवाशरैक्यदलहतशरस्य वर्गे दशा १०हतं नव ९ भिर्विभजेद्यत्फलं प्रजायते कार्मुकस्य फल
मित्यनेनानीतं धनुःफलं सप्ताशीतिद्विशतं २८८ इदं द्विगुणितदेव ५७६ ॥ ॥ इति वृत्तस्य फलानयनप्र
कारः ॥ ॥ इति वृत्तकुंडं ॥ ॥ अथ षडस्रिकुंडमाह ॥ ॥ श्रोण्योः पुरश्चांसयोरधस्तात् क्षेत्रस्य पश्चात्सुरतो
विदध्यात् अंशेन चिन्हानि षडत्र सूत्रैश्छिन्नं कृते हेतोः कथितं षडस्रि ३२ प्रथमं मुक्तप्रमाणेन समच
तुरस्रं विधाय पश्चाद्वृत्तं कर्त्तव्यं क्षेत्रस्य चतुरस्रं क्षेत्रस्य श्रोण्योः पुरः पुरस्तात् क्षेत्रपश्चिमभागं कोणौ श्रो
णीः पूर्वभागं कोणे वंसौ श्रोणितः पुरः पार्श्वसूत्रे एव अंसकयोरधस्तात् दक्षिणभागे पार्श्वसूत्रे एव अंशेन प्रमा
णसूत्रस्य अंशेन चिन्हानि कुर्यात् क्षेत्रस्य पश्चाद्दक्षिणगृहस्य प्राक्सूत्रे एव अंशेन चिन्हं कुर्यात् क्षेत्रस्य पुरणे
बहिः प्राक्सूत्रे एव अंशेन चिन्हं कुर्यात् एवं षड्चिन्हानि कृत्वा अत्र षट्सूत्रैः कृत्वा षडस्रि भवेत् एतच्छिन्नत्वहे
तोर्विरिछेदनमारणकर्मणि षडस्रिकुंडं मुनिभिः कथितमिति फलं कामः अत्र क्षेत्रफलं अत्रोपरि त्रिकोणमध
स्त्रिकोणं मध्ये दीर्घचतुरस्रमिति प्रकल्प्य उपरि त्रिकोणक्षेत्रे लंबः षोडशांगुलः १६ अधश्चैवं मध्यं द्वादशां
गुलं १२ अधश्चैवं लंबगुणमित्यनेनानीतं त्रिकोणफलं साष्टनवतिशतं १९२ अधश्चैवं एतदेवाधः त्रिकोणस्य

१९२ मध्यदीर्घत्वभयोराहत्यातदेव फलं १९२ त्रयं योगे हस्तक्षेत्रफलमिदं ५७६ अथान्यत्षट्कोणकुंडमाह क्षेत्रस्यो
दग्रमध्यसूत्रं जिनां २४ शंतस्मिन्नन्यथाम्यसौम्ये प्रवर्ध्य बाह्ये तस्मिन् वेद ४ वेदा ४ श्चभागा देयाश्चिह्नं तत्र कार्यं हितस्मात्
३३ कुर्यान्मत्स्यौ प्रोक्तवत्प्राक्परौ च सूत्रं दद्यात्तन्मुखाच्चिह्नगामी चिह्नात्सश्चासूर्वतस्त्र्यंशमाने शंकूरोप्यौ त्वेवमेवो
त्तस्यां ३४ त्र्यंशैः क्षेत्रात् प्राक्परौ रोप्य शंकू सूत्रे एतद्वेष्ट्य षट्कोणमुक्तं एतच्छत्रोर्मरणे छेदने च यद्वा शत्रुः कोपि नस्या
तदर्थं समचतुरस्रक्षेत्रस्य उदक्कृत तन्मध्यसूत्रं चतत् जिनां २४ शं विधाय जिनमिता अंशा यास्मिन् तत्तथा चतुर्विंशति
२४ धा विभाजितमित्यर्थः एवं कृतं कृत्वा तस्मिन् उदक्सूत्रे अन्यत्सूत्रं याम्यसौम्ये प्रवर्ध्य याम्याच्च सौम्याच्च याम्यसौम्यं
तस्मिन् समाहारेण पुंसकत्वं दक्षिण तश्चोत्तरतश्च रज्वे छयाद्बाह्यबहिर्भागे अन्यत्सूत्रं वर्धयित्वा तस्मिन् वर्धितसूत्रे वेदा
४ वेदा ४ श्चभागा देयाः वेदाश्च वेदाश्च वेदाश्च वेदा वेदा एवं कृता भागा अंशाः जीनांशीकृतमध्यसूत्रे चतुरो भागान् कृत्वैग
वामित्वा तेन प्रमाणेन दक्षिणतोत्तरश्च चत्वारश्चत्वार अंशा वर्धितसूत्रे देया इत्यर्थः तत्र हीति निश्चये येन स्पष्टं चिह्नं कार्यं
उभयतः तस्मात् चिह्नात् प्रोक्तवत् प्राक्परौ मत्स्यौ कुर्यात् चकारादुत्तरश्च अत्र मत्स्यनिष्पत्तिरेवं मध्याच्चिह्नादुभ
यतोंगुलमाने चिह्नयेत् पुनरनुयां ४ गुलेचैवं ताभ्यां कर्कटिकेन च मध्यसूत्रं घ्नतश्चिह्नाद्दृताभ्यां इषद्वयं तन्मु
खात्सूत्रदानेन प्राग्वोद्ग्वा रज्जुभवेदिति अत्र वर्धितसूत्रे यत्पूर्वं चिह्नं कृतं तन्मध्यचिह्नं प्रकल्प्य तस्मान्मत्स्यानि
ष्पत्तिमनेन प्रकारेण कृत्वा तन्मुखात् मत्स्यमुखात् चिह्नगामि यथास्यात्तथा पूर्वकृतचिह्नस्याग्रे प्रागपरसूत्रं स्वे
छयाद्दद्यात् एवं रज्जुसूत्रं दत्वा चिह्नात्पूर्वकृतचिह्नात् पश्चात्सूर्वतश्च मत्स्यमुखाद्दत्तरज्जुसूत्रे एव त्र्यंशमाने
शंकूरोप्यौ यत्र श्चतेंशा श्च त्र्यंशाः त्र्यंशैर्मीयते तत्त्र्यंशमानं तस्मिन् जिनांशीकृतमध्यसूत्रात् कर्कटिनत्रीनंशा
न्नित्वा पूर्वकृतचिह्नात् पश्चात्सूर्वतश्च दत्तरज्जुसूत्रे तैस्त्रिभिरंशैः यन्मानं कृतं तत्त्र्यंशमानं तस्मिन् शंकूरोप्यावि

स्यर्थः। एवमेवोत्तरस्यां दिशि शंकू ॥ अनेनैव प्रकारेणोत्तरतः एवं चतुरः शंकून्रोपयित्वा ततः चतुरस्रक्षेत्रात्
प्राक्परे पूर्वतः पश्चच्च प्रागपरगतप्राचीसूत्रे बहिरेव त्र्यंशैः त्रिभिरंशैः शंकूरोप्य ततः प्राक्शंकुतः एतत्सर्वसूत्रेण
संवेष्ट्य षट्कोणं स्यात् ॥ अन्यन्मार्जनीयं शत्रोर्मारणे छेदने तथा कोपि शत्रुर्नाभिभवेदिति वाच्यं ॥ एतत्कुंडं मुनिभिरा
कमिति ॥ अत्र क्षेत्रफलमेवं ॥ उपरि त्रिकोणं अधस्त्रिकोणं मध्ये दीर्घचतुरस्रं प्रकल्प्य उपरि त्रिकोणे लंबो द्वादशांगुलः
१२ १ अन्यर्धपोडशांश १६ गुलं अधोप्येवं मध्ये दीर्घचतुरस्रपार्श्वभुजः षडंगुलः तिर्यक्भुजो द्वात्रिंशत् ३२ पूर्वोक्तरी
त्या फलयोगात् क्षेत्रफलं स्यात् ॥ ॥ अथान्यप्रकारेण षट्कोणमाह ॥ ॥ जिन २४ लवमितसूत्रेण क्रा ९ न्प्रहवालयां
सत्र हलत्रयलयांतः सूत्रखंडेन वृत्तं हरिचरणविदिक्षु हृदं कयेन्मंडलेतः परिधिनृप १६ लवेनांतौ कयेच्चिह्नपार्श्वे ३६
अंतर्दिक्चिह्नपार्श्वे पुशंकून्द्वादशरोपयेत् ॥ दिक्चिह्ने बाह्यतः षट्चसूत्रैः षट्कोणकं भवेत् ॥ ३७ ॥ जिनलवेति चतुर्वि
शतिधा उक्तसूत्रे अंकानूलेखान् ॥ अन्यान्नव ९ भागान् दत्वा तद्दलेनार्धेन वलयं कृत्वा तन्मध्ये मुख्यसूत्रार्धेन
द्वितीयं वृत्तं कृत्वा द्विमंडले बाह्यांतरवृत्ते हरिचरणविदिक्षु अंकयेत् चिह्नयेत् हरिश्च चरणश्च विदिश्च हरिदिक्
प्राग्वित्यर्थः ॥ चरणदिगपरा विदिशः प्रसिद्धाः प्रागपरा आग्नेयनैर्ऋत्यवायव्येशान्यासु इत्यर्थः ॥ दक्षिणोदक्विना षट् सुदिक्षु अं
कयित्वा पुनरंतः परिधिनृपलवेन अंतः अंतवृत्तेकृतचिह्नपार्श्वे रत्नरेखाभिर्वा कयेत् अंतवृत्तपरिधिषोडशेन अं
तवृत्तिकृतचिह्नोभयपार्श्वे कयेदित्यर्थः परिधोडशांश एव षट्सूर्यः अत्र वृत्तनेमिप्रोक्तेयं द्वितीयश्लोकस्य सुगमार्थः अत्र
हलमात्रं प्रहवक्षेत्रफलमुच्यते चतुर्विंशतिलवसूत्रेण यांशवृध्या बाह्यवृत्तव्यासस्त्रयस्त्रिंशत् ३३ तत्खंडं १६ । ४ अं
तर्वृत्तव्यासार्धतोऽधिकं साद्धं चत्वारि गुलानि ४ । ४ अथमेवलंबः अंतर्वृत्तपरिधिः पंचसप्ततिः ७५ अंतपरिधि
षोडशांशः साद्धपंचयव चतुरंगुलः ४ । ५ । ४ इदमेव भवर्धपरिधिश्चोव्यासपादइत्यनेनांतर्वृत्तफलसार्धचतुःशतं ४५०

लंबगुणमित्यनेनैकत्रिकोणफलमेकविंशतिः २१ इदं षड्गुणं १२६ वृत्तषट्कोणफलयोगाद्वृत्तक्षेत्रफलं भवतीति
॥ ॥ इति षट्कोणं ॥ ॥ अथ पद्मकुंडमाह ॥ ॥ जिन २४ लवमितिसूत्रे ध्यं ४ शहीनाद्वि ७ वृद्धे हलकृतवलयांतः
सूत्रखंडेन वृत्तं प्रतिदिशमृजुशंकून् षट् बाह्ये दलकृतरष्टांतरवलयगताष्टांतोष्टशंकूनिरवन्यात् ॥ ३८ ॥ प्राक्शंकोः
प्रतिवृत्तमंतरगतानेकांतरान्वेष्टयेत् रवातेव्यासगजांशकेन वलयं द्विघ्ने च नान्यच्छिरवेत् ॥ स्वव्यासो च्छ्रितिमंततो विरच
येत्सकर्णिकांतद्वहिः कुर्यात्केसरचिह्नितं तिगहितं पद्मं सुवृष्टिप्रदं ॥ ३९ ॥ ॥ अत्र कुंडकरणार्थमाह सूत्रकृत्कृतिगत
सिमपद्मिः कार्या ॥ ॥ तत्र कुंडस्थले प्राचीसूत्रं सम्यक्कयादत्वा मध्यस्थाद्दक्सूत्रमपि दत्वा ऽष्टदिक्कं मेखला
मानाधिकान्यष्टसूत्राणि गैरिकतया चूर्णेन वा सूक्ष्माणि सरलानि मध्यकेंद्रस्थानीणि दत्वा पश्चाद्वृत्तकर्तव्यमिति जिनल
वेति जिनलवैर्मितिं चतुर्विंशतिधा विभाजितप्रमाणसूत्रं तस्मिन् ॥ एकभागस्य अनुक्तेरूपस्येति अध्यंशे ४ न चतुर्थां
शेन हीनाद्यः भागचतुर्थांशोनाद्वि ७ मिलवैः सप्तलवैर्वृद्धिः प्रमाणसूत्रे वृद्धिर्देया प्रमाणसूत्रसहित वृद्धे हलेनार्धेन हल
त्रयं वलयं यस्यात्तमध्ये सूत्रखंडेन मुख्यप्रमाणसूत्रार्धेन वृत्तं द्वितीयं वृत्तं कार्यं ॥ अयमर्थः ॥ प्रथमं एकभागाध्यं ४ शोन
सप्तलवविवृद्धे युक्ते प्रमाणसूत्रे कृते सति ॥ अथ तद्दलेन व्यासार्धेन वलयं कृत्वा पश्चात्तन्मध्ये सूत्रखंडेन मुख्यजिनलव
मितसूत्रार्धेन द्वादशलवप्रमितेन व्यासार्धेन द्वितीयं वृत्तं कार्यं इत्यर्थः ॥ ततः प्रतिदिशमृजुशंकून् षट् बाह्ये निरवनेत् बाह्ये
वलये दिशं दिशं प्रतिऋजून् सरलान् षट् शंकून् निरवन्याद्रोपयेत् ॥ ततः अंतः ॥ अष्टशंकून् रोपयेत् ॥ अंतर्वलये द्वि
तीये वलये प्रतिदिशं अष्टशंकून् रोपयेत् इत्यर्थः ॥ तदनंतरं षट्पः पुनः अंतर्वलयगतांष्टांतोऽष्टशंकून् निरवन्यात् अंतो
रंचसत्वलयं च तत्रगताः ॥ वर्तमानाष्टचते अष्टच द्वितीयवलये प्रतिदिशं प्ररोपिताष्टशंकवइत्यर्थः ॥ तेषामंतर्मध्ये रोपित
शंकुंतराले कर्कटेन मित्वा तन्मध्यदेशे अन्यानष्टशंकून् रोपयेत् ॥ इति चतुर्विंशतिशंकुरोपणं विधाय ततः प्राक्शंकोः

बाह्यवृत्तकप्राकृशंकोः सकाशान् प्रतिसूत्रं यथारयात्तथा अंतरगतानेकान्तरान् एकः अंतरं येषां ते एकांतराः तान् सूत्रेण वेष्टयेत्। द्वितीयवलयं विदिगताष्टशंकून्विना सर्वान्वेष्टयेदित्यर्थः। इति वेष्टयेत्वा पद्मस्याष्टदलानि स्फुटदलं विना बाह्यांतररेखाः मार्जयित्वा दलैः सह मध्ये युक्त्या खनेत् खननं च यथेदं वक्ष्यमाणमपि अत्र कर्णिकाकेसरांशाहनार्थं तिथिभागतुल्यं खातं खननं कृत्वा समस्थलं कार्यं तस्मिन्कृते खाते व्यासगजांशकेन वलयं कर्णिकार्थं लिखेत् मुख्यप्रमाणसूत्रस्याष्टांशेन अंगुलात्मकेन व्यासार्द्धेन कर्णिकार्थं वलयं कुर्यादित्यर्थः। द्विघ्नेन चान्यल्लिखेत् केसरार्थं अनेनाष्टांशेन द्विगुणितेन व्यासार्धेन केसरार्थं द्वितीयं वलयं कुर्यात्। इति वलयद्वयं कृत्वा स्वव्यासो ध्रुवमंततो विरचयेत्सकर्णिकां कर्णिकावलयव्यासेन षडंगुलात्मकेनोच्चामंततो मध्ये सकर्णिकां बिंदुरवायुक्तां विरचयेत् ता हि केसरवलये केसराचिन्हितं कुर्यात् यथा पद्मकर्णिकायाः बाह्यतः समंताकेसरा एव संति तथा चिन्हितं कार्यं मृत्तिकया कर्णिकामूलसंलग्नानि सूक्ष्माणि षोडश केसराणि अग्रे बिंदुयुक्तानि बाह्याग्राणि समंता द्विरचयेदिति पद्मकुंडं स्यात्॥ ॥ इदं सुदृष्टिप्रदं मुनिभिर्निगदितं इति फलश्रुतिः॥ ॥ अत्र हस्तमात्रं क्षेत्रं प्रकृत्य क्षेत्रफलमुच्यते॥ ॥ अत्रांतवृत्तस्य पूर्वोक्तिप्रकारेणानीतः परिधिः पंचसप्तांगुलः ७५ परिधिघ्नो व्यासपादः इत्यनेन वृत्तक्षेत्रफलांगुलानि सपंचाशच्चतुःशतं ४५० इदं हस्तक्षेत्रफलमध्ये ऊनं कृत्वा यदवशिष्टं सषड्विंशतिशतांगुलं १२६ एतत्स्वाष्टदलेषु समायास्यति तत्प्रकारो यथा॥ अंतर्वृत्ताद्बहिर्वृत्तं त्रियवाधिकत्र्यंगुलं ३।३ अयमेव त्रिकोणलंबः अंतर्वृत्तपरिधिषोडशांश एव एव त्रिकोणचर्धं चतुरंगुलं साधपंचयवं ४।५।४ रत्ननेमिरेव भूमिर्ज्ञेया त्रिकोणभुजयोर्मूलभागे रज्जुभूमिदर्शनेन किंचित्त्रिकोणफलस्य वृत्तमध्ये समावेशाद्वृत्तनेम्यामेव चर्धं किल्पितं लंबगुणमिसनेनैकत्रिकोणफलं सषड्यवपंचदश १५।६ इष्टमष्टगुणमष्टकोणानां फलं इदमंतर्वृत्तफले युक्तं सद्वृत्तक्षेत्रफलं स्यात्॥ एवमेव बहिर्

स्तात्तेन तद्गुलगणनया वेधं अंतर्वृत्तरेखा बहिर्वृत्तरेखा त्रिकोणं विना मार्जनीयाः॥ ॥ इति पद्मकुंडं॥ ॥ ॥ अथाष्टास्रिकुंडमाह॥ ॥ द्विघ्नव्यासेशांशयुग्व्यासजाताब्धस्रस्यैकैकोभुजः स्यात्चतुर्धा दत्वोपांत्याहा चतुर्थांशिमस्मिन्सूत्राण्यष्टाष्टास्रिकुंडं गदघ्नं ४० द्विघ्नव्यासस्य दशांशः एकदशांशस्तेन उक्तो व्यासो व्यासश्च तेन जातं च तद्ब्धस्रं च तस्य एकैकोभुजश्चतुर्धा क्रियाः प्रमाणसूत्रं व्यासः द्विगुणितप्रमाणसूत्रस्यैकादशांशेन युक्तं व्यासः मुख्यप्रमाणसूत्रं तेन अब्धस्रं चतुरस्रं कृत्वा तस्यैकैकोभुजः चतुर्धा समतया विभज्य तत्र तत्र चिन्हानि कुर्यादित्यर्थः अस्मिन्कृतचिन्हे चतुरस्रे उपांत्यात्। चिन्हादस्य उपरि पार्श्वं तस्मादुपांत्याद्दारभ्य आचतुर्थांशं यथा स्यात्तथा चतुर्थचिन्हपर्यंतं अष्टसूत्राणि दत्वा अष्टास्रिकुंडं स्यात् चतुर्थांशं चतुर्थचिन्हं प्रति भुजं उपांत्ये एव पतति कथं भूतं कुंडं गदघ्नं रोगनाशकरं उक्तं मुनिभिरिति फलश्रुतिः॥ ॥ एवं त्रीणि चतुरस्राणि भवंति तत्र बाह्याद्यचतुरस्रस्य सर्वाः रेखाः संरक्ष्याः अधोऽधोमिगतं तिर्यग्रेखाः सर्वाः संमार्जनीया इति रेखाष्टकं मार्जयित्वा अष्टास्रिकुंडं कृतं स्यात् अत्र हस्तक्षेत्रं प्रकृत्याष्टास्रिफलमुच्यते द्विगुणितप्रमाणसूत्रस्यैकादशांशस्त्रियवाधिकश्चतुरंगुलः ४।३ अनेन युक्तो मुख्यव्यासो ऽष्टाविंशत्यंगुलः सत्रियवः २८।३ अनेन कृतचतुरस्रक्षेत्रफलं सपंचाष्टशतं ८०५ एतन्मध्ये हस्तक्षेत्रफलमूनं कृतं सत्यदवशिष्टं तत्साधिताष्टास्रक्षेत्राद्बहिः पतितमिदमधिकं सैकोनत्रिंशत् द्विशतं २२९ एतत्सकलमष्टास्रिक्षेत्रसाधनानंतरं चतुरस्रस्य चतुष्कोणेषु यत्क्षेत्रमधिकं यच्चतुर्दिक्षु चाधिकं तस्य तत्साधनप्रकार एवं चतुःकोणेषु द्वे द्वे त्रिकोणे समभुजे तत्रैकत्रिकोणस्य मध्यलंबः सप्तांगुलः सत्रियवः यवस्थाने भूतं ७।०।३ भूम्यर्धं यवोनत्र्यंगुलं २।७ लंबगुणमिसनेन जातमेकत्रिकोणफलं द्विषष्ट्यधिकशतं १६२ चतुर्दिक्स्थत्रिकोणार्धद्वयं तत्समुख्यसंनेकीकृत्य पूर्णत्रिकोणं प्रकल्प्य तल्लंबः सप्तांगुलः ७ भूम्यर्धं द्व्यंगुलं सपक्षत्रियवं २।३।१ लंबगु

एगमित्यनेनजातं मेकत्रिकोणस्यफलंशोऽशांगुलंषड्यवाश्च १६।६ इदंचतुर्गुणंसप्तशष्टि ६७ उभयफलयोर्योगिः सैकोनत्रिं
शत् द्विशतं २२९ इदंपूर्वछिन्नचतुरस्रफलेऊनंकृतंसद्धस्तक्षेत्रफलंभवति ५७६ यद्वाचतुर्दिक्षुचतुर्दिक्षुनिचत्वारिक्षेत्रा
णितत्रद्वयोर्द्वयोर्योगेकृतेसकृभयतः प्रउगद्वयंभफल्यंतत्क्षेत्रफलंशुद्ध्येयथा उभयतः प्रउगंचेन्मध्येतिर्यगपछिद्य
प्रउगंचतुरस्रंचिकीर्षन्मध्यंप्रांचमपछिद्यविपर्यस्येतरतउपधायदीर्घचतुरस्रसमासेनसमस्येससमाधिरिसनेनाप्फल
यदीर्घचतुरस्रफलयोगः सप्तषष्टिरिति ६७ ॥ ॥अथपंचास्रिकुंडमाह ॥ ॥ द्विघ्नव्यासाऽष्टांश ७ युग्व्यासखंडाद्वृ
त्तव्यासः स्वपंचांशयुक्तः तत्खंडज्याः पंचतास्मिन्प्रयोज्याः पंचास्रिस्यादभिचारप्रशांत्यै ४१ द्विगुणितव्यासस्याऽष्ट्य
शः सषड्यवः षडंगुलः तेनयुग्व्यासोमुख्यप्रमाणस्तत्रंतस्यात्खंडात्तृतीयार्थेपंचमी खंडेनाहेनि १५।३ वृत्तंकार्यंतद्व्या
सोमध्यसूत्रंयोव्यासोभवतिसः स्वपंचमांशेनयुक्तः कार्यः तत्खंडज्याः तस्यार्धप्रमितज्याः तास्मिन्वृत्ते पंचज्या वृत्तातः प
रिधिसंलग्नाः परस्परंकोटिसंलग्नाप्रयोज्यायथापंचमीज्याप्रथमज्याः मूलेसंलग्नाभवति तथाप्रयुक्ताः सत्यः पंचास्रिस्यात् ॥
अत्रज्याएवसंरक्ष्यधनुषोमाजनिंकृत्वा पंचकोणकुंडंभवेत् ॥ अभिचारशमनार्थंभूतशाकिनीग्रहनिग्रहपीडाविनाशना
र्थंमुनिभिरुक्तमितिफलश्रुतिः ॥ अत्रपंचास्रिसप्तास्योः फलसाम्यात्सप्तास्रिनोक्तं ॥ ॥ अत्रहस्तक्षेत्रं प्रकल्प्यपंचास्रि
फलमुच्यते ॥ ॥ अत्रवृत्तव्यासः षड्यवाधिकत्रिंशदंगुलः ३०।६ वृत्तव्यासकृतेरिति पूर्वोक्तेन वृत्तपरिधिः सप्तनवति
९७ परिधिघ्नोव्यासपादइत्यनेन वृत्तफलं सैकचत्वारिंशत्सप्तशतं ७४१ वृत्तफलं हस्तक्षेत्रफलयोर्यदंतरं तद्धनुषांफल
माधिकंसपंचषष्टिशं १६५ इदमेवधनुषांफलं कथंसमायातितत्प्रकारएवं अत्रधनुर्ज्यात्रियमाधिकाष्टादशांगुलाधिका
१८० ज्याषष्ट्यंशः शरस्त्र्यंगुलः ३।० जीवाशरैक्यदलहतेत्यादिनाधनुःफलं त्रयस्त्रिंशत् ३३ इदंपंचगुणंपंचषष्ट्यधिकश
तं १६५ इदंवृत्तफलेतूनंकृतंसद्धस्तक्षेत्रफलं पंचास्रिणः भवेदिति ५७६ ॥ ॥अथप्रकारांतरेण पंचकोणमाह ॥

जिन २४भागीकृतंसूत्रंदिक्षु १० भागैश्च प्रवर्धयेत् षड्भिर्भागैः वस्वंशैः ८साद्धैर्नदलतो रत्नि ॥४२॥ सूत्रार्धेनिपुनश्चां
तः प्राग्विदिक्षुचिन्हयेत् अंतर्वृत्तांकोभयतः परिधिषष्ठं १६ शतांकयेत् ॥४३॥ शंकुचिन्हेषुचारोप्य दिक्षुचिन्हेष्वेव
बाह्यतः पंचकोणंचसूत्रैस्यात् कूर्मरूपंहिसुंदरं ॥ ४४॥ चतुर्विंशतिधाकृतंप्रमाणसूत्रंदशभागैर्वर्धयेत् ॥ एकभागस्यच
खंडैः षड्भिः साधंदशभागैर्वर्धयेत् ॥ इतिवर्द्धनंकृत्वा तद्दलतः रत्निसूत्राद्देनिवृत्तं कूर्यादित्यध्याहारः पुनश्चांतर्मध्येमु
ख्यप्रमाणसूत्राद्देनिवृत्तंकुर्यात् ॥ ततोवृत्तद्वयं प्राग्विदिक्षुचिन्हयेत् प्राक्चविदिशश्चचासु अंकयेत्प्रतीचींविनाततोंतर्वृ
त्तांकोभयतः अंतर्वृत्तेपरिधेः षोडशांशेनांकयेत् पार्श्वचिन्हेषुदशशंकुनारोप्य बाह्यवृत्तेदिक्षुचिन्हेष्वेवपंचशंकून् सूत्रैः
शंकून्वेष्टयित्वापंचकोणंस्यात् ॥ बहिर्वृत्तादिक्षुचिन्हेषु कोणाग्राणि ॥ अत्रहस्तमात्रं प्रकल्प्यक्षेत्रफलमुच्यते प्रमाणसूत्रार्ध
कृतांतवृत्तव्यासश्चतुर्विंशांगुलः २४ वृत्तव्यासकृतेरिसनेन वृत्तपरिधिः पंचसप्तति ॥७५॥ परिधिघ्नोव्यासपादइत्य
नेन वृत्तफलं सपंचाशच्चतुःशतं ४५० हस्तक्षेत्रवृत्तक्षेत्रफलयोः अंतरं षड्विंशत्यधिकशतं १२६ एतद्वृत्तफलादधिकं
पंचकोणफलाद्वासिः तत्प्रकारोयथा अत्रत्रियमाधिकसप्तदशांगुलव्यास्यानकृतं बहिर्वृत्तं अंतर्वृत्तव्यासार्द्धतः सत्रियव
पंचांगुलाधिकता अत्रायमेवत्रिकोणलंबः सत्रियव पंचांगुलः ५।३ परिधिषष्ठ्यंशाद्भूम्यर्धंसार्द्धपंचयवचतुरंगुलं ४।५
४ लंबगुणमित्यनेनएकत्रिकोणफलं पंचविंशतिरेकोयवः पंचयुक्तं २५।१।५ इदंपंचगुणं १२६ इदंवृत्तफलेसंयोज्य
हस्तक्षेत्रफलंभवेत् ५७६ एवमानेनप्रकारेणद्विहस्तादिकेज्ञेयं द्विहस्तेवृत्तपरिधिः १०७ व्यासपादः ८।४ वृत्तफलं
९०१ लंबः ७।४।२ ऊर्ध्वं ६।५।४ लंबगुणमित्यनेनैकत्रिकोणफलंपंचगुणितमिदं २५१ उभयोर्योगोद्विहस्तक्षेत्रफलं
११५२ ॥ ॥इतिपंचकोणकूर्माकारः ॥ ॥ ॥इतिनवकुंडानिसामान्यानि ॥ ॥अथकुंडस्यसांगत्वसिद्ध्यर्थंकुंटमे
खलाखातप्रमाणंसांगोपांगेनाह ॥ ॥ शुल्काजिनैः २४ सूत्रमपास्यभागं कुंटंचतु ४ स्त्रि ३ द्वि २ लबायताश्चकोनवृ

तु ६ त्रि ३ लवोच्छ्रिताः स्युस्तिस्रो ३ त्रखातं तिथि १५ भागतुल्यं ॥ ४५ ॥ अत्र मेखलानंतरं यद्यपि खातं सूचितं तथापि कुंडकर्तुः प्राशस्त्यात्सूर्यमेव तिथिभागतुल्यं पंचदशांगुलप्रमितं कुंडक्षेत्रे खातं खात्वा पश्चात्कंठादिकुर्यात् खातं मेखलया सहेति खातं सर्वमेखलोच्छ्रयेन यथाक्षेत्रमानं भवति ॥ आद्यामेखला नवभागं पंचदशभागं क्षेत्रे खातं कुर्यात् केचित् विस्तृति संमितोच्छ्रा मेखलाकुक्षस्तदनुसारेण मेखलयासह क्षेत्रस्तत्र प्रमाणं खातं ज्ञेयं प्रमाणसूत्रं जिनैर्भक्त्वा चतुर्विंशतिधा विभज्य खाता द्विभागिं कंठं एकभाग प्रमाणं कंठं कंठस्थलमपास्य सत्कंठा द्विभागिति स्त्रः कांच्यो मेखलास्युः कथं भूताः चतुस्त्रिद्विलवैः यथानुक्रमेण एताः विस्तृताः ॥ प्रथमा कंठसंलग्ना चतुर्भागैर्विस्तृता नवभागैरुच्छ्रिता उच्चाः द्वितीया त्रिभागैर्विस्तृता ऋतुभागैः षड्भागैः उच्चा ॥ तृतीया द्विलवैर्विस्तृता त्रिलवैरुच्चा भागो वेशश्च एकार्थवाची अत्र लवशब्देनांगुलानि इति ज्ञेयं उच्चत्वं तु मुखः सकाशादंतरतो ज्ञेयं ॥ इति तिस्त्रः कांच्यः स्फुरितिं त्रिमेखलपक्षः ॥ यदुक्तं कालोत्तरे खाताद्धस्तांगुलः कंठः सर्वकुंडेष्वयं विधिरिति पिंगलेपि ॥ खाताद्धस्तांगुलं मुक्त्वा मेखलानां स्थितिर्भवेदिति ॥ ॥ ॥ अथ पंचमेखलापक्षमाह ॥ ॥ षट् ६ पंच ५ वेद ४ त्रि ३ यमांशाविस्तृताः पंचस्फुरं कांशसमुन्नताहिनासास्वेकभागे ५ नपरं परोनितास्फमेखलाः कुंडसमानविग्रहाः ४६ कंठाद्धस्तद्वयदेशे प्रथमा मेखला षडंशविस्तृता षड्भागैर्विस्तृता द्वितीया पंचांशैः तृतीया चतुरंशैः चतुर्थी त्र्यंशैः पंचमी द्व्यंशैः इति विस्तृतैस्ताः पंचमेखलास्युः तत्राहिनासा प्रथमांकांशसमुन्नता नवभागैः ॥ उच्चाः यानवांगुलोच्चा प्रथमा तस्या एव द्वादशभागाः पंचमांशस्तेन पंचमांशेन ऊनासा प्रथमा कृतासती द्वितीयोच्चा ज्ञेया एवं परं परोनिता काया अस्यायमर्थः प्रकृतत्वान्नवांगुलाहिनाया एव पंचमांशएकमंगुलं षट् यवास्तिस्त्रः यूकाः १।६।३ अनेनैव स्वैकभागेन प्रथमोनिता सती रहिता सती द्वितीयोच्चा ज्ञेया उच्चत्वं चांतरतो ज्ञेयं अनेनैव पंचमांशेन द्वितीयोना कृता सती तृतीया स्यात् तृतीयोना कृता सती च

तुर्थी स्यात् चतुर्थीपि तेनैव पंचमांशोनोना सती पंचमी स्यात् इत्यर्थः परंपराशब्दस्य प्रांतगतपंचम्यास्तु विस्तृतमुच्चत्वं च ह्यंगुलं द्विहस्तादौ चतुर्विंशतिधा विभाजितस्य सूत्रस्य यदंगुलप्रमाणं समायाति तदंगुलैर्यथाभागं मेखलानां विस्तृत्वं उच्चत्वं च तथा खातमपि ज्ञेयमिति कथंभूताः कुंडसमानाविग्रहाः यथा कुंडानां स्वरूपं तथा मेखला अपीत्यर्थः कुंडानां यादृशं रूपं मेखलानां च तादृशमिष्टकैः ग्रंथांतरे एकमेखलमपि सूचितं एकाषडंगुलोत्सेधा विस्तारा मेखला मतेति ॥ ॥ ॥ अथ कुंडानां योनिमाह ॥ ॥ प्रागादिषु याम्ययोनिरपरे भूक्ता प्रचेतोदिशि प्राग्वत्स्यान्नवमे त्रिभागवितता व्यासार्धदीर्घमिता सिद्धांशैः २४ शोच्यचिता गजोष्टसदृशी द्वीद्वर्धकांच्योन्विता कुंडांतर्जिनभागमासविवरात्तन्मेखलोर्ध्वस्थिताः ४७ अत्र नवकुंडीविधाने मध्यवेदिकायाः परितोष्टदिक्षु प्रागादिषु क्रमेण वेदिकायाः षडमात्रं संचरत्स्वा चतुरस्त्रयोन्याः यष्टकुंडानां स्थितिरुक्ता नवमकुंडस्य ईशपूर्वयोर्मध्ये स्थितिः हेमाद्रिणा तु वेदिकायाः परितो द्विहस्तांतरं मुक्त्वा दिक्कुंडस्थितिरुक्ता धान्ये पर्वतदानविधौ तु मंडपमध्ये धान्यपर्वतकरणे नमंडपस्य मिस्त्र व्याप्तामंडपस्येशानकोणे पूर्वमेव होमार्थमेकं चतुरस्त्रं कृत्वा पश्चाद्धान्यपर्वतः कार्य इति दानखंडे चोक्तत्वात् ॥ ॥ ॥ अथ नवकुंडेषु योनिकरणप्रकारं दर्शयति प्रागादिषु त्रिषु कुंडेषु प्रागग्नेयदक्षिणदिक्कुंडेषु याम्यायां योनिरुक्ता दक्षिणस्यां योनिमूलमुद्गमं अपरेषु पंचकुंडेषु प्रचेतोदिशि पश्चिमदिशि योनिरुक्ता योन्यग्रं पूर्वे नवमे कुंडे प्राग्वत्स्याद्दक्षिणतो योनिरित्यर्थः प्रागग्नियाम्यकुंडानां प्रोक्ता योनिरुदङ्मुखीति स्यात् यंतु वचनाद्दाग्नेयेपि योनिं कुंडे योनिः कार्येति योनिकुंडे योनिं भक्त्वा कुंडेनाग्निं च वर्जयेदिति शारदोक्ते इति विरोधो स्त्यायं तु वचनस्य नैवार्थ्यापत्तेः नेति तद्वचनं तु सर्वदिक्चतुरस्रकुंडकरणपक्षविषयमिति भावः सयोनिः कथं कार्या त्रिभागवितता कुंडप्रमाणसूत्रस्य त्रिभागेन प्रकृतत्वाद्दष्टांगुलप्रमाणेन मूलभागे वितता विस्तृता व्यासार्धदीर्घा प्रमाणसूत्रस्याधेन दीर्घमिता प्रोक्ता अग्रभागे संकोचगता अत एव गजोष्टसदृशी

यथा गजौष्ठो ऽग्रभागे संकुचितस्तथा कार्या योनिरूपमप्येवमेवास्ति द्वींद्वधकांचान्विता द्वेचते इंद्वधेचिकांचीच द्वींद्व
धकांची नियुक्तासि द्वांशेन औच्यं चतुर्विंशतितमांशेन एकांशेनांगुलात्मकेन औच्येन चितारचिता कार्या कुंडांतर्जिन
भागगा कुंडमध्ये चतुर्विंशतितमांशेन एकांगुलेन गच्छति प्रविशति मध्ये कंठप्रमाणं गता इत्यर्थः एकांगुलेयाकांच्या क
टिमेखला यान्विता द्वींद्वधेकांच्यपि कुंडमध्ये एकः भागप्रवेशनं चैतत्सर्वं योनिप्रयाणमध्ये एवदर्शनीयं सविवरा योनि
मध्ये रंध्रयुक्ता एकांगुलं रंध्रं छिद्रं कर्तव्यं अंगुलपर्वमात्रमितिहेमाद्रिः तन्मेखलोर्ध्वस्थिता एवंभूता योनिः कुंडपश्चि
मे मेखलोपरि मध्यभागे छिता कार्या तथा चागमांतरे योनिलक्षणं कुंडव्यासत्रिभोनाविस्तृता मूलदेशतः व्यासार्द्धेन
तु दीर्घा च योनिः साध्यात्रिकोणवत् मूलपार्श्वद्वयांतास्यां यावल्लाक्षं स्पृशंकृतः उच्चैः कुंडजिनांशेन रचयेच्च
समानतः तस्याः पश्चाच्चतुर्थांशात् खंडेंदुद्वयसंयुता परितात्र रचनाणेच मेखलां कटिसूत्रवत् दर्शयेच्च जिनांशेन
मध्ये चसुखिरं तथा न्यूनाधिकानकर्तव्या होषश्रवणभीतितः कुंडकांच्यपरिस्थाप्या योनिः पश्चाच्च मध्यतः याव
कंठप्रमाणं च प्रविष्टाग्रे एगमध्यतः मायास्वरूपं योनिश्च सर्वं प्रिस्तृपते ध्रुवं योनिरूपमिदं प्रोक्तं बुधैरागमवेदिभिरिति
चतुर्थांशाच्चतुर्थांशेन तृतीयार्थे पंचमी योनिमूलेद्वौ चतुलिंगोलकौ ऊर्ध्वतिलान्नालमपि स्थापनीयमितिग्रंथांतरो
क्तत्वात् ॥ ॥अथ नाभिमाह कुंडमध्ये ॥ ॥ व्यासषड्भागविस्तारा व्यासाऽर्कांशसमुच्छ्रिता नाभिः
पद्मनिभा कुंडमध्ये पद्मं विना विशेत् ४६ नाभिशब्दः स्त्रीलिंगपुल्लिंगवाची पद्माकारा नाभिः कुंडमध्ये विशेत् निवेशयेत्स्था
पयेदित्यर्थः व्यासषडंशेन विस्तारा विस्तृता व्यासार्कांशेन व्यासद्वादशांशेन समुच्छ्रिताऽऽच्या पद्मसंन्निभाऽष्टदला तत्तत्कुं
डाकारा वास्थाप्या पद्मं विना पद्मकुंडं विना पद्मकुंडं तु न्यासिस्थाने कर्णिकायाः विद्यमानत्वात् नारांतिकं कंठमेखलायोनि
रूपैरंगैः सहचतुरस्राहीनां नवकुंडानामितिकर्तव्यतामुक्त्वा इदानीं ग्रंथसमाप्त्यलंकारः आसीत्कौनरवरसेवितेम

णौरंगक्ष्णः कौशिककुलगरिधौलल्लामतसुत्रोहरिरपिताद्दशोऽस्य पुत्रोऽनंतोऽग्निप्रतिनिधिरहिताग्निरस्य ॥ ४७ ॥
श्रीनारायणकविरंगजश्चकारस्वहस्तमंडपविधिदर्पणसकुंडं ॥ यज्ज्ञनंतहिहचशास्त्रतोऽवगम्यं तुष्यंतु कृतु ॥ ४८ ॥ कौशि
थ्यिानरवरसेवितेमाणौरेनगरेक्ष्णाऽभिधआसाद् ॥ कथंभूतात्कौशिकरुषिवंशसमुद्भूतल्लामरत्नात् तत्पुत्रस्तस्य कृष्णस्तु
त्रोहरिरपिताद्दशस्तत्सदृश आसीत् अस्यहरेः पुत्रोनंताभिधआसीत् कथंभूतअहिताग्निः अग्निहोत्रीअग्निप्रतिनिधिः
अग्निसदृशोब्राह्मण्येनतेजस्वीत्यर्थः ग्रंथांतरात् बुधैःसुचितः ॥ ॥ ॥अथ ग्रंथोत्पत्तिकालमाह ॥ १ ॥ शतघ्नतिथिभिः
१५०० स्तुल्यैः शाल्विवाहशकाब्दके ग्रंथोयंवापरग्रामे रचितो बहुधान्यके ॥ ४९ ॥ शतगुणितपंचदशभिः समानशालिवा
हनशके बहुधान्यसंवत्सरे वापरग्रामे कुंडदर्पणाख्योयं अथोविरचितइति ग्रंथव्याख्या ॥ कुंडदर्पणकर्तुश्च नारायणस्य
धीमता ॥ गंगाधराख्यपुत्रेण स्वल्पमत्याकृतानुया ॥ १ ॥ कुंडदर्पणटीकासाख्यत्यामनोरमाभिधा अंगिकार्या बुधैः प्रीत्यैसं
तोष्टव्यं मदुक्तितः ॥ २ ॥ ॥ इति श्रीमदनंतचातुर्भास्यिया जीपुत्रनारायणाग्निचित्सुतगंगाधरकृता कुंडदर्पणटीका म
नोरमाख्यासमाप्ता ॥ ॥ ग्रंथसंख्या ७०७ ॥ ॥ ॥ छ ॥ ॥ शके १७८८ क्षयनामाब्दे अधिकज्येष्ठ वद ३ गुरौ संपूर्णं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

।। इतिश्रीकुंडदर्पणटीकासंपूर्णं।।